न तादृशव्यवहारविषयत्वमवच्छेदकमत आह व्याप्यत्वासिद्धीति संभवदपि पृथिवीत्वाभावादिव्यावृत्तं संभवदपि न तथा न व्यवहारविषयतावच्छेदकं
गौरवादिति अव्यभिचरितत्वविशिष्टसामानाधिकरण्यरूपव्याप्यत्वाभावापेक्षया व्यभिचारस्य लघुत्वादिति भावः केचित्तु व्याप्यत्वासिद्ध्युन्नायकत्वं व्या
व्याप्यत्वे न विशेषितेनाविशेषितसाधारणेन व्याप्यत्वाभावोन्नायकत्वमभ्युपेयमिति पृथिवीत्वाभावादिसाधारणं संभवदपीत्यर्थः गौरवादिति स्वमते
पृथिवीत्वाभावादावतिप्रसंगस्य दोषत्वसंभवेपि पूर्वपक्षिणा पृथिवीत्वाभावादेरप्युपाधिव्यवहारस्येष्टत्वात् तदतिप्रसंगो नोपदर्शित इति व्याच
ख्युः अत एव निरुक्तव्याप्यत्वासिद्ध्युन्नायकत्वस्याकाशहेतुके द्रव्यत्वाद्यपसंग्राहकस्य व्याप्यत्वासिद्ध्युन्नायकव्याप्यत्वासिद्धिप्रतियोगित्वस्य
गौरवेण व्यवहारविषयतानवच्छेदकत्वादेव व्याप्यत्वेनेति आकाशं जलत्वव्याप्यं द्रव्यत्वव्याप्यत्वादिति क्रमेणेति भावः एवं लाघव
स्यादरणीयत्वे स्वव्यभिचारेण विशेषिताविशेषितेन तथा व्यवहारविषयतावच्छेदकं लाघवादिति यत्किञ्चिदधिकरणत्वस्य सामा
न्यस्याप्रवेशाच्च उक्तोपाधौ पृथिवीत्वाभावरूपोपाधौ तद्धीति यादिलाघवं लाघवपुरस्कारात् व्यवहारे नादरेणोक्तरूपो विषयतावच्छेदकत्व
स्वीकारस्तदित्यर्थः साध्याभावेति रूपाभावद्रव्यत्वोभयाधिकरणघटादिवृत्ति पृथिवीत्वाभावप्रतियोगित्वाभावात् पृथिव्यादौ पृथिवीत्वाभावादेस्तावता

पिवारणमेवेतिभावः अतिलाघवादिति उन्नायकत्वे व्याप्यत्वादेः प्रवेशात्तदपेक्षया लाघवमिति भावः ननु यद्व्यभिचारित्वेनेति मूले उन्नायकत्वस्यैव
व्यवहारविषयतावच्छेदकत्वकथनाविरोध इत्यत आह अस्तु चेति सहार्थेति यद्व्यभिचारित्वेन सह साधनस्य साध्यव्यभिचारित्वं मूलार्थः तद्रू
येति तद्रूपस्य विरुद्धसाधारणत्वात् साध्यसामानाधिकरण्यविशेषणेऽपि तद्रूपे व्यभिचारस्यातिस्फुटत्वात् ज्ञानस्योपाधित्वव्यवहारजनकत्वादितिये
दितदाद्यपृथिवीत्वाभावसंग्राहकत्वदुक्तेऽपि रूपे तुल्यमित्यर्थः ननु पृथिवीत्वाभावादौ तेषां नोपाधिव्यवहार इत्येव कुतो निर्णीतमत आह अन्तरे
वेति घटत्वव्यभिचारानुमापकत्वमात्रेण नोपाधिव्यवहारः किंतु यद्धर्मावच्छिन्नेत्यादिरूपेणातस्तन्नेत्यर्थः साध्यव्याप्यतावच्छेदकं
साध्यतिष्ठोपाधिनिरूपितव्याप्यतावच्छेदकं नियमत इति कदाचित्तु सरणयथा कथंचिद्व्यभिचारोन्नायकतामात्रेणाप्युपाधित्वव्यवहा
रः प्रसज्येतेतिभावः यद्वृत्तीति यद्रूपावच्छिन्नव्यभिचारे सत्यवश्यं साध्यव्यभिचारस्तद्रूपेण नियमइत्यर्थः यथा सश्यामो मित्रातनयत्वादित्यत्र
शाकपाकजत्वोपाधौ मित्रातनयत्वं तादृशधर्मस्तद्वृत्तिशाकपाकजत्वव्यभिचारस्य श्यामत्वव्यभिचारनैयत्यात् वायुः प्रत्यक्षः प्रमेयत्वादित्य
त्रोद्भूतरूपोपाधौ चबहिर्द्रव्यत्वं तादृशो धर्मस्तद्वृत्तिरूपव्यभिचारस्य प्रत्यक्षत्वव्यभिचारनैयत्यात् अन्यथा सतामित्रातनयत्वमात्रावशेष्यकधौ
विशेष्यत्वे सति शाकपाकजत्वव्यभिचारित्वादिरूपादिक्रमेण [illegible] व्यभिचारानुमानसंभवेनेयमिदुपेमैत्रीतादृशधर्मानुसरणतवाप्युत्वस्यात् तथाचतथा
तादृशधर्मानुसरणादेवं जातीमो पदैकाधिकरणोत्पन्नावेन यद्व्यभिचारः साध्यव्यभिचारनियतः सत्वोपाधित्वे तेषामभिप्रतोनान्यो आतः पृथिवीत्वाभावा कुस
दौतद्वारणसुवितमेवेतिभावः ननु महाकालान्यो घटादित्यत्र दैशिकविशेषणतया साध्यतायां कालिकेन हेतुतायां खंडकालभेदे पृथिवीत्वाभावसन्महातुल्य १९

तयानुपाधावतिव्याप्तिः खंडकालभेदाभाववति खंडकाले कालिकत्वतयाक्रान्तित्वस्य महाकालभेदाभाववन्महाकालवृत्तित्वरूपसाध्यव्य
भिचारव्याप्यत्वात् न च तद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिदधिकरणवृत्तित्वस्य साध्यव्यभिचारव्याप्यतायामधिकरणस्यापि व्याप्य
तायामधिकरणस्यापि व्याप्यतावच्छेदककोटिप्रविष्टत्वविवक्षणादत्र नातिव्याप्तिस्तत्र तु कालिकसंबंधेन वृत्तित्वमात्रस्यैव महाकाल
वृत्तित्वव्याप्यतया वैयर्थ्येनाधिकरणस्याप्रवेशादिति वाच्यं तथासति तत्र तत्पदोपाधौ महाकालान्यत्वप्रकारकप्रमाविषय
त्वादावव्याप्तिस्तद्व्यभिचारस्यापि व्याप्यतायां वैयर्थ्येनाधिकरणस्याप्रवेशात् एवं इदमेतदुपाभिन्नगुणत्वादित्यत्राप्येतद्रू
पभेदउपाधावतिव्याप्तिरेतद्रूपभेदाभाववदेतद्रूपसमवेतत्वस्य तद्रूपाभिन्नसमवेतत्वव्याप्यत्वात् एतेनतो
द्रव्याद्यत्किंचिदधिकरणवृत्तित्वस्य तादात्म्येन साध्यव्यभिचारव्याप्यत्वविवक्षितं महाकालखंडकाले दृष्टान्तित
योः स्वरूपसंबंधात्मकत्वेन महाकालखंडकालस्वरूपपर्यवसानानन्तादिल्ये नुव्याप्तिरितिपरास्तं एतद्रूपस
मवेतत्वस्यैतदुपभिन्नसमवेतत्वस्य चैकेन तथाप्यवारणात् हेतुनिष्ठस्वरूपसंबंधेन साध्यव्यभिचारेऽन्यये ह
उक्ताव्याप्तिमेयीग्येत्वाभावाच्चत्वस्वरसादाह वस्तुतस्त्विति यदभावेनेति खंडकालभेदाभावस्य महाकालाभे

शि॰टी॰भ॰ दाभावासाध्यकत्वान्नोक्तस्थले ऽतिव्याप्तिरिति नन्वद्रव्यं सत्वादित्यत्र संयोगादेरुपाधित्वं न स्यात्साधनवन्निर्गुणादौ संयोगाभावेन द्रव्य
१७ त्वाभावानुमानासंभवात्तस्य केवलान्वयितया गुणवृत्तित्वादिविशिष्टस्य तस्य हेतुतायां विशेष्यवैयर्थ्यात् न च गुणादिवृत्तित्वविशिष्टसत्वा
दिनापि संयोगाभावस्याहेतुत्वमक्षतमेवेति वाच्यं तथा सति गन्धवद्द्रव्यत्वादिक्रसाधनव्यापकतया तु पाधौ संयोगादावतिव्याप्तेः अवृत्तिहि जलत्वं
धाभाववज्जलावृत्तित्वविशिष्टादित्यनुमितौ विशिष्टत्वेन संयोगाभावस्यापि हेतुत्वमतो यद्भावमात्रवृत्ति धर्मेणोन्नायकता वाच्या तथा चाध्याप्तिस्त
दवस्थैवेत्यत आह यद्वादन्यत्वेन वेति कथावादिति एवं च यद्व्यभिचारेण साध्यव्यभिचारयोरिति तद्व्यभिचारेशाद्धोऽस्त्वेवमितिभावः अतएवे
ति जलत्वतेजस्त्वोभयवृत्तौ प्रासिध्यातुदन्यत्वस्याप्रसिद्धत्वादितिभावः एवंविवक्षायां त्विदं स्नेहवद्द्रव्यत्वादित्यत्र जलत्वतोज
स्त्वयोरुभयत्वेनोपाधित्वस्यानद्भूतावाच्छिन्नाभावाघ्रिकरणीभूतयात्केचिदधिकरणाच्चमत्कृथिव्यादिवृत्तित्वस्य स्नेहव्याभिचा
रव्याप्यस्य द्रव्यत्वे सत्वात्तात्रातिव्याप्तेः साध्यादितिभावः अत्र च सामानाधिकरण्यात्वेनावाच्छिन्नस्य धर्मिणोऽन्नके त्वेपि ८

पि वस्तुरीणोपत्वान्नेनैवास्यपि वारणसंभवात्र एवेत्यादिपाठः मान्यादिक इति केचित्तु बस्तुतस्तूपाधितावच्छेदकपर्याप्त्यवच्छिन्नस्यसा
ध्यसमानाधिकरणत्वमुपाधितावच्छेदकस्ववास्ताध्याधिकरणवृत्तितावच्छेदकत्वपूर्वकत्वेवक्तव्यं अत्र कल्पे तूपाधितावच्छे
दकाश्रयस्य साध्यसमानाधिकरणत्वमवच्छेदकस्य वा साध्यसमानाधिकरणवृत्तित्वमात्रं वक्तव्यम् न तु तत्पर्याप्तेरपि
प्रवेश इति लाघवं न च धूमवान्वह्नेरित्यत्र हृदवृत्तित्वविशिष्टधूमत्वत्वादिना ऽत्र कल्पेऽपाधितापत्तिः तदवच्छिन्नाभावस्य
तदवच्छिन्नवन्तेदस्यैव पर्यवसन्नधर्माभावानुन्नायकत्वादिति प्रकृतलक्षणवासमपि न लक्ष्यतया व्याचष्टे पक्षव्यभिचारित्वेने
त्यादिना हेतुमद्वृत्तित्वेति साधनवान्साध्याभाववानुपाध्यभाववानित्यनुमाने साधनवति ऽपाध्यभावरूपहेतुमत्व
भाने साध्याभावरूपसाध्यावत्वभाने च तद्वृत्तित्वमपि पक्षतावच्छेदके साधने भासते ऽपाधिव्यभिचारत्वस्यानुमि
तिजनकज्ञानविषयत्वरूपमन्नायकत्वं साध्यव्यभिचारस्यानुमितिविषयत्वं च संभवतीतिभावः अत्र चेति अनयोः
कल्पयोरित्यर्थः अवच्छिन्न इति ऽपाधितावच्छेदकावच्छिन्न इत्यर्थः ऽपाधित्वे पर न इति व्यभिचारानुमानस्यैहे
धनत्वेनोपाधित्वव्यवहारस्य च समानाधिकरणव्यक्तेरेवोपपत्तौ तत्स्योपाधितावच्छिन्नाभावेपि न क्षतिरितिभावः
अत्र च यद्धर्मावच्छिन्नप्रतियोगिताधिकरणतासाध्याधिकरणे तद्धर्मावच्छिन्नत्वाक्रिरूपोऽपाधिरिति पूर्वस्य यद्धर्मावच्छे

शि०टी०
२८

न्नाधिकरणतासाध्याधिकरणे तद्धर्मावच्छिन्नमुपाधिरिति द्वितीयस्यार्थः तेन विशिष्टस्यानतिरिक्तत्वाद्धूमवान्वह्नेरित्यादौ ह्रदवृत्तित्व
विशिष्टद्रव्यत्वादिना नोपाधित्वमिति भावः प्रथमविवक्षानुसारेणाह तेनेति द्वितीयविवक्षायां तु ह्रदत्वाभावस्य व्यभिचा
रित्वया किंचिद्विशेषणदाने च व्यर्थतया साध्याभावसाधकत्वानुसारेणाह नवेति इदं तेजो द्रव्यत्वादित्यत्र स्पर्शसामान्या
भावो ज्ञातस्य भावश्च वह्निदूरत्वाभावविशेषस्य शीतस्पर्शजलत्वात्मकस्य साध्याभावो ज्ञापकत्वसंभवात् अत्रापि तद्विशेष
णं तत्रापि स्पर्शाभावस्य जन्यत्वेन ज्ञप्तिस्वमतेऽनुत्पत्तिकालावच्छेदेन साध्यसमानाधिकरणत्वात् ज्ञातस्य भावपर्यन्तानुसरणं शी
तस्पर्शेति इदं तेजस्त्वाभाववच्छीतस्पर्शवत्त्वाज्जलत्वादित्यनुमानाकारो बोध्यः पूर्वविवक्षायां यद्यपि व्याप्तिः पूर्वमु
क्तात्तथापि तत्र ह्रदत्वाभाववदयोगोलकवृत्तित्वस्य ज्ञापकतायामयोगोलकवृत्तित्वस्यैव सामर्थ्यात् परमावस्य ज्ञाप
कतावच्छेदककोटिप्रविष्टविशेषणोपि तद्वारणसंभवात्तदंतर्भाव्यापि तत्र व्याप्तिमाह तद्वृत्तित्वेनवेति प्रथमोपन
स्तस्यापि चरमव्याप्तिदानं तद्भेदेन तदभावस्य परामर्शो लाघवाय एवमन्यत्रापि यथायथं बोध्यं इदं च प्रौढिवा
देनोक्तं न प्रथमविवक्षायां महाकालान्यो घटादित्यत्र कालिकसंबंधेन हेतुतायां सद्रूपाद्यव्याप्तिः कालिकसंबंधेन
वृत्तित्वमात्रस्यैव साध्यव्यभिचारस्याप्यतयोपाध्यभावस्य वैयर्थ्येनाप्रवेशात् ह्रदत्वादिति द्रव्यत्वं तेजस्त्वव्यभिचारि

रमा

तस्पर्शवद्वृत्तित्वाज्जलत्ववद्वृत्तित्वादित्यनुमानशरीरं बोध्यं ज्ञातस्य भावादौ नातिव्याप्तिरित्यनुषंगेणान्वयः ॥ नन्विदं कंबुग्रीवादिमद्द्रव्य
त्वादित्यत्र घटत्वव्यभिचारित्वविवक्षमाणलक्षणाक्रान्ते लक्ष्यतावच्छेदकस्याव्याप्तिः तद्व्यभिचारित्वस्य तदभावस्य वा वैयर्थ्येन साध्य
व्यभिचारे साध्याभावे वा ज्ञापकत्वात् प्राह द्रव्यत्वं कंबुग्रीवादिमत्त्वव्यभिचारि घटत्वव्यभिचारित्वव्यभिचारित्वात् गगनपरिमा
णवदित्यत्र घटत्वादित्यस्यैव सामर्थ्ये अधिकस्य स्वरूपासिद्धिवारकतया वैयर्थ्यात् यद्द्रव्यं कंबुग्रीवादिमत्त्वाभाववद्घटत्वव्यभि
चारित्वाभावाद्गगनवदित्यत्र घटत्वाभावादित्यस्यैव साधकत्वेधिकस्य वैयर्थ्यादत आह इदमत्वादिनेति घटत्वव्यभिचारित्वं घ
टत्वाभाववति संयोगेन समवायेन वा वृत्तित्वं घटोपर्युलत्वविनाश्य घटस्यापि घटत्वाभाववत्यध्यस्तेन घटावयवे संयोगेन वृत्तित्वा
त्साध्याव्यापकत्वं संयोगेन गगनादेर्वृत्तित्वे तु तस्य साधनव्यापकतया घटत्वाभाववत्समवेतत्वमेवोपाधिरिति ध्येयं घ
टत्वादेरिति व्यभिचारसाधनमभिप्रेत्य यद्यपि घटत्वव्यभिचारे भावाधिकरणीभूतगगनवृत्तित्वादेस्तद्रूपेण हेतुतायां घट
त्वादेरप्रवेशान्न वैयर्थ्यसंभावना तथापि प्रौढिवादेन यदभावस्यापि व्याप्यतावच्छेदककोटिप्रवेशमभिप्रेत्य वैयर्थ्यो
पमाहितमिति ध्येयं ॥ तदभावस्येति ॥ साध्याभावसाधनमभिप्रेत्य धूमप्रागभाववदिति न च तथापि घटत्वव्यभिचा
रित्वव्यभिचारित्वे घटत्वव्यभिचारित्वत्वस्य सत्त्वात्तद्रूपावच्छिन्नस्यैव व्याप्यतायामधिकस्य वैयर्थ्यमेवेति वाच्यं ॥ संयोगे

न घटत्वव्यभिचारित्वस्योपाधितायामुक्तव्याप्यभावव त्तिहेतुतावच्छेदकेन समवायेन वृत्तित्वप्रवेशाद्वैयर्थ्याभावात्॥ समवायेन
घटत्वव्यभिचारित्वस्योपाधितापत्तौ तु घटत्वव्यभिचारित्वस्य घटत्वव्यापकतया तदभावस्याखंडत्वेन घटक्लिमद्वृत्तित्वेहेतौ घट
त्वव्यभिचारित्वाऽप्रवेशान्नवैयर्थ्यमितिवस्तुतः। पूर्वकल्पे यदभावस्य व्याप्यतावच्छेदककोटिप्रवेशस्तन्नविविक्षितः घटत्वव्य
भिचारित्वेना प्युपाधिव्यभिचारित्वस्य हेतुतायामुपाधित्वानपायादित्येव समाधानं बोध्यं व्यं यद्व्यभिचारित्वेयदभावेवा
प्यद्धर्मावच्छिन्नस्य प्रतियोगितया व्याप्यतावच्छेदककोटिप्रवेशस्तद्धर्मावच्छिन्नस्योपाधित्वमित्याशयं मत्वाशंकते नन्वे
ति धूमवान्वह्नेरित्यादावयोगोलकत्वाभावो नोपाधिस्यात्तस्योन्नायकतापामप्रवेशादित्यर्थः साध्याभावस्योन्नायकता
यां प्रतियोगिनो व्यभिचारोन्नायकतायां तद्वृत्तित्वस्यैव हेतुत्वादिति॥ तस्य पदभावत्वस्य। वस्तुतो वस्तुगत्या व्यभिच
एसाधने यदभावत्वप्रवेशेपिवैयर्थ्याभावं केषांचिन्मतेदर्शयति॥ तदभावेति॥ अयोगोलकत्वत्वद्वृत्तित्वस्यानुपस्थितो एमा
अयोगोलकत्वाभावाभाववद्वृत्तित्वस्य व्यभिचारोन्नायकतायां हेतुत्वेन वैयर्थ्यमित्यर्थः॥ व्यभिचारसाधने चेति। साध्या
भावसाधने तु हेतुतावच्छेदकरूपेणोपस्थितत्वाद्वैयर्थ्यमेवेति वदंतीत्यस्वरसस्तु दीजं तु महाकालाभावो घटादित्यत्र व्य
भिचारसाधने केवलहृत्तित्वस्यैव व्याप्यत्वात्तदभावस्य चाप्रवेशेमदुक्तमेव समाधानं अभावस्य क्वाचित्कत्वि

व्याप्यतावच्छेदकत्वोक्तिस्तुधोरितिवादिनेस्यैवसारम् कंबुग्रीवादिमत्वादेर्घटत्वप्रतियोगितावच्छेदकत्वेन व्याप्यतावच्छेदकत्वमपि
तत्र समानाधिकरणलघुधर्मामप्रवेशेपि व्याप्यतावच्छेदकत्वे तस्य वैयर्थ्यमेवेत्यस्वरसमाह॥ यद्धर्मावच्छेदेनेत्यत्र यद्धर्मस्याव
च्छेदकत्वमन्यूनवृत्तित्वमनतिरिक्तवृत्तित्वं स्वरूपसंबंधविशेषो वान संभवति सत्प्रत्यमोमित्रात नयत्वादिसादेर्मित्रातनयत्वा
दीनां तथात्वासंभवादत आह यद्धर्मवतीति॥ एवं यद्धर्मवत्ति साध्यंप्रसिद्धं तदवच्छिन्नसाध्यव्यापकत्वस्य विवक्षणे स्यपक्षै
कदेशइति वह्निमान्धूमादित्यत्र महानसत्वावच्छिन्नवह्निव्यापकत्वंजनेवत्वादावित्यर्थः अपेति अत्रावच्छेदकत्वं व्यापक
त्वं महानसत्वे च न धूमवद्वृत्तित्वविशिष्टवह्निव्यापकं तेनर्द्रेंधनवत्वादेर्नातिप्रसंगः। साधनवद्वृत्तित्वविशिष्टसाध्यव्या
पकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वापेक्षया साधनविशिष्टसाध्यव्यापकत्वस्यैव लघुत्वात्तदेवाह साध्यसाधन
संबंधेति॥ साधनविशिष्टसाध्येइत्यर्थः नन्वेवं विह्न द्रव्यस्थलीयोपाधावव्याप्तिस्तत्र साध्यसाधनसंबंधाप्रसिद्धेरत आ
ह विरुद्धमात्रेचेति मात्रपदं कृत्स्नार्थकं यथाऽवृत्तिगगनादौ विरुद्धे उपाध्यभावेन क्षतिस्तथाविरुद्धांतरेपीत्यर्थःस्तच
नाथ नन्वेवं लक्ष्यतावच्छेदकस्यतत्साधारणापात्तत्र लक्षणाभावेऽव्याप्तिरत आह लक्ष्यतावच्छेदकेति धूमवान्वह्नेरि
त्यत्र धूमसमानाधिकरणवंन्हेर्धूमव्याप्यत्वात्तत्र व्यभिचारोन्नायकत्वं न संभवतीत्यतस्तादृशवृत्तित्वेनेति साध्यसमा

नाधिकरणवृत्तित्वेनेत्यर्थः नन्वसाध्यसाधनसंबंधव्यापकत्वमपि यथाश्रुतशब्दान्न लभ्यत इति साधनवन्निष्ठेतिपदप्रवेशेन
तदर्थलाभ इति यद्धर्मपदस्य साधनव्यापकधर्मपरतया विरुद्धस्थलीयोपाधिसंग्रहसंभवेन तत्संग्रहोऽव्याप्य इत्यत आह सा
धनेति सद्धेतौ तु साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकस्य साधनव्यापकत्वनियमात्पक्षैकदेशवृत्तिधर्मेणा
तिप्रसंग इति भावः।। अंतत इति तादृशधर्मान्तरास्फूर्त्तावप्यन्ततस्त्वमादायैव लक्षणगमनमिति भावः ननु वापक्षः प्रमेयः
प्रमेयत्वादित्यत्र प्रमेयत्वव्यापकधर्मावच्छिन्नप्रत्यक्षत्वस्य पक्षमात्र एव सत्त्वान्न व्यापकतया नोभूतरूपवत्त्वमुपाधि
स्यादत आह प्रमेयत्वादित्येतेति।। आदिपदाद्द्रव्यत्वादिरूपव्यतिरेकिधर्मपरिग्रहः लक्ष्यतावच्छेदकस्य तत्साधारणं
वारयति लक्ष्यतावच्छेदकेति प्रयोजकत्ववाचीति।। प्रयोजकत्वं चात्र तादृशरूपेण व्याप्यत्वं तदेव दर्शयति यद्व्यभिचा
रस्थल इति उभयरूपव्यभिचारस्य तत्तादृशप्रयोजकत्वमात्मादौ प्रमेयत्वस्य तत्त्वेऽपि पक्षत्वव्यभिचाराभावादि
ति।। वन्हिर्दाहानुकूलधर्मसमवायी दाहजनकत्वादित्यनुमाने गुरुत्वादेर्दाहानुकूलत्वाभावात्कोकरूपावच्छिन्न
साध्याव्यापकत्वमतोऽनुमानाकारं दर्शयति जनकत्वेति तथा च वन्हिः कार्यानुकूलादृष्टादियधर्मसमवायी
जनकत्वादित्यनुमाने जनकत्वावच्छिन्नस्य गुरुत्वात्मकसाध्यस्य घटादौ सत्त्वान्न व्यापकता नोपाधित्वं स्यादित्यर्थः।।

रमा

वह्निरिन्द्रियाप्रत्यक्षत्वस्यागुरुत्वावच्छिन्नस्य गुरुत्वात्मकसाध्यस्य घटासाधकव्यापकस्य स्थितिस्थापकस्य पृथिवीमात्र
वृत्तित्वमिति मतेनेदं तेनालोकादौ न साध्याव्यापकतेति ग्रंथस्तत्रैवेति अन्येनोभावनेयं यद्रूतोंत त्वमतमित्यपित
त्रेतिरं स्यादिति तन्त्रिएक। एतार्थमिदमुक्तं ग्रंथविरोधस्य लक्षणघटकोपाधिपरंतु पाप्युद्गुणशक्लत्वात्तह दूषकेत
ति जनकत्वं कार्यानुकूलातीन्द्रियधर्मव्यभिचारि अगुरुणि वह्निरिन्द्रियाप्रत्यक्षत्वव्यभिचारित्वादित्यादिरीत्या व्यभिचा
रोन्नापकत्वमस्त्येवेत्यर्थः।। यद्धर्मेति महानसत्वावच्छिन्नवह्निव्यापकस्यार्द्रेंधनवत्त्वादेर्महानसत्वावच्छिन्नधूमव्याप
कत्वान्नोपाधित्वमिति भावः।। ननु घटो रूपवान् पृथिवीत्वादित्यत्र सद्धेतौ तद्घटोत्पत्तिकालावच्छेदेन तद्घटे रूपस्याभावा
त् पृथिवीत्वस्य सत्वाच्च तद्घटोत्पत्तिकालीनत्वावच्छिन्नरूपव्यापकस्य तद्घटान्यत्वस्य तद्घटोत्पत्तिकालीनत्वावच्छि
न्नपृथिवीत्ववति तद्घटेऽवर्तमानस्योपाधित्वं स्यादत आह अवच्छेदकत्वं चेति तथा च यद्धर्मसामानाधिकरण्यवि
शिष्टत्वमेव यद्धर्मावच्छिन्नत्वं तत्तु स्वरूपसंबंधरूपविवक्षितमिति भावः नन्वेकस्मिन्नेवोपाधौ व्याप्यतावच्छेदकध
र्मभेदाल्लक्षणभेदः स्यात्तत्तादृशधर्माणामानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मत्वेनानुगमय्य साधनाव्याप
कत्वविशेषणपरित्यागेन लाघवं चनदिति धायलक्षणमाह स्वानधिकरणेति स्वेऽपाधित्वेनाभिमतमार्द्रेंधनादि

तदनधिकरणीभूतं यत्साधनाधिकरणं तद्वृत्तीत्यर्थः सद्धेतौ तु स्वानधिकरणीभूतं यत्साधनाधिकरणं तद्वृत्तिधर्मावच्छिन्न
साध्यस्य स्वानधिकरणीभूतसाधनाधिकरणे अवश्यं वृत्तित्वान्न व्यापकत्वमिति व्याप्तिनिरूपकत्वं व्यापकत्वमित्यभिप्रा
येण शङ्कते यद्यपीति धूमस्यार्द्रेन्धनादिव्याप्यतया धूमत्वेनैवावच्छेदादार्द्रेन्धनाद्यव्याप्तिरिति भावः तद्धर्मेति तादृशा
वच्छेदकधर्मेत्यर्थः॥ अत्र च तादृशाभावप्रतियोगितायाः विशिष्यापादेयत्वेन तद्रूपवान् रूपवत्त्वादिस्यादेतद्रूपाधि
करणनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यैवावच्छेदकतया यत् किंचिद्धर्मावच्छिन्नतद्रूपाधिकरणघटितस्य
गोत्वादेरनवच्छेदकत्वेपि न व्याप्तिः सखण्डोपाधेरार्द्रेन्धनादेस्तादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वासं
भवादाह आदीतीति तथा चोपाधितावच्छेदके तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वानवच्छेदकत्वं विवक्षि
तमिति भावः॥ नन्वयं प्रत्यक्षो गुणत्वादित्यत्रोद्भूतरूपवत्त्वेनोपाधिः स्यात्तस्य शुद्धसाध्याव्यापकतया वहिर्द्र
व्यत्वावच्छिन्नसाध्यव्यापकतयोपाधित्वे वहिर्द्रव्यत्वस्य स्वानधिकरणीभूतसाधनाधिकरणवृत्तित्वाभावेन तेना
दायोक्तलक्षणस्य तत्राभावादत आह गुणत्वादिनेति घ्राणजन्यत्वेति॥ उद्भूतरूपानधिकरणं साधना
धिकरणं घ्राणकगुणस्तद्वृत्तिघ्राणकजन्यत्वतद्वच्छिन्नप्रत्यक्षत्वं तत्र शरीरेणानन्तोद्भूतरूपमितिलक्षणेऽस्म

न्वयः। वहिर्द्रव्यत्वमादायैवोद्भूतरूपे लक्षणगमनमिति नियमाभावादिति भावः केचित्तु शुद्धसाध्याव्यापकेऽपि साधनावच्छिन्न
पक्षधर्मावच्छिन्नं वा साध्यं प्रतिव्यापकत्वमुपाधित्वं तथा च घटः प्रत्यक्षो गुणत्वादित्यत्र घ्राणत्वाभावात्रोद्भूतरूपमुपा
धिः स्यादत आह गुणत्वादिनेति घ्राणकजन्यत्वेति तादृशयत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वेनैव नियमो न तु ता
दृशधर्मस्य साधनादिरूपत्वेनापीति भाव इत्याचक्षुः॥ उक्तरूपोपाधिज्ञाने व्यभिचारानुमानमपि सुकरं भवतीत्या
ह एवं चेति वायुः प्रत्यक्षो रूपवत्त्वादित्यत्रोद्भूतरूपवत्परमाणोरुद्भूतत्वस्य साध्यव्यभिचारसत्त्वात्परमाणु घटा
न्यतरस्मिन् रूपवत्त्वे उद्भूतरूपव्यभिचाराभावादुपाधिव्यभिचारस्य हेतोः स्वरूपासिद्धिरतः स्वानधिकरणेति। उद्भूतरू
पानधिकरणीति द्वित्रिचतुर्गुणादौ सत्त्वात्ता साध्यव्यभिचारसत्त्वात्तु रूपघटान्यतरस्मिन् रूपवत्त्वे उद्भूतरूपव्यभिचाराभाव
न यैव सिद्धिरतः साधनस्येति॥ स्वानधिकरणीभूतसाधनाधिकरणत्वम घटान्यतरस्मिन् उद्भूतरूपव्यभिचारस्य प्र
क्तव्यभिचाराव्याप्यत्वात्तत्संपत्तयेऽसाध्यव्यभिचार इति विशेष्यभागसार्थक्यार्थं पञ्चेत्यादि तत्रापि स्वानधि
करणसाध्याधिकरणप्रवेशे तन्मात्रवृत्तिधर्मे उपाधिव्यभिचारिणि साध्यव्यभिचाराभावेन तथैव व्यभिचारा
त्साधिकरणमिति तद्भयवृत्तिधर्मस्य स्वानधिकरणसाध्याधिकरणवृत्तित्वेन चैव व्यभिचार इत्यतो मात्रेति ते

व्यभिचारेणोपाधिव्यभिचारेण यस्मादेवं न साधनवत्तिसाध्याभाववद्वृत्तीयत इति तन्मतानुसारेणाह साधनवत्तिवेति मित्रात
नयः श्यामत्वाभाववान् मित्रातनयत्वात् शाकपाकजत्वाभावात् एवं रूपवत्त्ववान् रसवत्त्वाभाववान् हि ह्रदे व्यक्ते सप्तभूत
रूपाभावात् इत्यादिक्रमेणानुमानं काकादावात्मादौ च व्यभिचारवारणाय सत्त्वन्त इति एतस्यापि लक्षणस्य ज्ञानघटि
तत्वेन तत्साध्यकतत्साधनकस्थावदुपाधिसाधारणत्वेन घटत इति लक्षणान्तरमाह साध्यासमानाधिकरणस्येति सद्धेता
वुपाधिलक्षणस्यातिप्रसंगवारणाय पाधिकरणमित्यन्तं साधनवद्विशेषणं साध्यासमानाधिकरणत्वं च साध्यवद्वृत्ति
त्वं सद्धेतुमतः साध्यवद्वृत्तिमत्त्वाभावान्नात्र तत्रातिप्रसंगः मूलोक्तसाध्यव्यापकत्वापरित्यागे नैव लक्षणं कर्तुं गुरुं वि
विशेषणमाह साध्यव्यापकाभावस्येति साध्याभावस्येति सर्वोपि स्वपाल्य व्यापिनोक्तमुपाधिशरीरमात्रे व्यभिचा
रस्याग्रयमतः स्फूर्तौ तु पाधिनात्यभिचारान मानस्य संमदापि कस्यवेप्यर्थ्यादिति पृथिवीगंधवत्तो द्रव्यत्वादित्य एमा
त्र साधनव्यापकस्य संयोगस्य वारणाय व्यधिकरणान्तं तत्रैव पृथिवीति वृत्तिविशिष्टद्रव्यत्वादिनोपाधित्वरक्ष
णाय प्रतियोगितावच्छेदकावच्छिन्नेति उपाधेस्तादृशाभावप्रतियोगितोक्तौ पृथिवीत्वसंयोगोभयत्वावच्छिन्ना
भावस्य तादृशस्य प्रतियोगित्वात् पृथ्वीत्वातिव्याप्तिरिति प्रतियोगितावच्छेदकेति लघुत्वमनियन्त्रकं वुद्धीवादिमत्वादि

नानुत्तोपाधित्वमिति भावः विरुद्धवारणाय साध्यसमानाधिकरणेति साध्यासमानाधिकरणं ईंधनव्यक्तिसंग्रहाय व
वच्छेदकेन द्धित्वविशेषणं अत्र च साध्यव्यापकताघटकसंबंधेन साध्यव्यापकाभावः साधनवृत्त्वं हेतुतावच्छेदकसं
बंधेन प्रतियोगित्वेप्यधिकरणं साध्यसामानाधिकरणं चोपाधिताघटकसंबंधेन व्याप्तित्वं तच्च व्याप्तिलक्षणवद्बोध्यम
नुमूलोक्तलक्षणे साधनपदस्य सामान्यपरस्य साध्यव्यापकाभावादिसमानाधिकरणसाधनविशेषपरतया तथालक्ष
णाघोवर्णनीयस्तत्र साध्यवद्वृत्तिवारणमात्रफलं पर्यवसित साध्यव्यापकत्वपर्यन्तं च यत्साध्यसमानाधिकरणत्वे
नैवतद्वारणसंभवादत आह एवं चेति क्वचित्पर्यवसितेत्याधेवपाठः पूर्वलक्षणादेतल्लक्षणस्योत्कर्षप्रदर्शयितुं
तत्साध्यकेति सकलोपाधीति एकसंबंधावच्छिन्नसकलोपाधीसर्षः ।। तेन संबंधभेदेन प्रतियोगित्वेप्यधिकरण्यादेरु
पाधिताघटकसंबंधभेदेन साध्यसमानाधिकरणवृत्तित्वस्य च भिन्नत्वेपि न क्षतिः ।। यथाश्रुतं प्रसमनुसंधाया
ह साध्यव्यापकत्वेति सद्धेतावतिव्याप्तिवारणाय वृत्त्यन्तं च वह्निमान्धूमादित्यादौ रूपत्वादेरपि भिन्नरूपेण साध्यव्या
पकत्वसाधनाव्यापकत्वोभयवत्त्वात्तदनतिरिक्तवृत्तिरूपेणोपाधितास्यादतो वच्छेदकेति तत्र च तदुभयस्यैकाभावा
नातिव्याप्तिः ।। धूमवान्वह्नेरित्यादावयोगोलकावृत्तित्वमेवतादृशं रूपं तदनतिरिक्तवृत्तित्वस्य हृदत्वेसत्त्वादतिव्याप्ति

शि॰टि॰म॰

२२

रणत्साध्यसमानाधिकरणेति साध्यसमानाधिकरणधर्मीत्वमित्यर्थः ह्रदवृत्तित्वविशिष्टद्रव्यत्वत्वादिनोपाधित्वं स्यादतस्तस्यैव
व्याप्तिव्यक्षेः कृतः॥ अवच्छिन्नसाध्यव्यापकोपाधिसाधारण्याय साध्यव्यापकतावच्छेदकेति न कृतं केवलान्वयित्वावच्छे
दकस्यैव साध्यसमानाधिकरणधर्मसामान्यव्यापकतावच्छेदकत्वादसंभवइत्यतो यत्किंचिदिति नच यत्किंचित्साध्यव्या
किवृत्तित्वावच्छेदकत्वेनैव सर्वसामंजस्ये गुरुतरारंभोव्यर्थ इति वाच्यं साध्यवद्वृत्तितायाः स्वरूपसंबंधरूपावच्छेदकत्वानभ्यु
पगमात्स्वातिरिक्तवृत्तित्वादेश्च ह्रदवृत्तित्वविशिष्टद्रव्यत्वत्वादिसाधारणतापत्तेः रूपावच्छिन्नाधिकरणतासाध्याधिक
रणेतद्वृत्तस्योक्तौ नुपयोगित्वप्रवेशाद्यनवगमः अत्र चक्रं वृषीवादिमलादिनानुपाधित्वेयत्किंचिद्भावप्रतियोगिता
वच्छेदकत्वमपि धर्मे विशेषणं देयं अवच्छिन्नसाध्यव्यापकोपाधेर्लक्षणं समर्थयति अवच्छिन्नेति स्वश्यामो मित्रा
तनयत्वादित्यादौ गौरमित्रातनयावृत्तित्वमेव तादृशो धर्मस्तदनतिरिक्तवृत्तित्वस्य शाकपाकजत्वे सत्त्वाभावमिति भा रामा
वः शाकपाकजत्वविशिष्टद्रव्यत्वस्याप्यवच्छिन्नसाध्यव्यापकोपाधित्वात्स्य गौरमित्रातनयावृत्तित्वाभावान्नातस्तो
पसंग्रह इत्यत आह तत्रापि गौरमित्रातनयभेदविशिष्टद्रव्यत्वस्य तादृशतदनतिरिक्तवृत्तित्वेनैव लक्षणग
मनमिति भावः गंधवती द्रव्यत्वादित्यत्र पृथिवीरतित्वविशिष्टद्रव्यत्वत्वस्य साध्यव्यापकत्वसाधनाव्यापकत्वावच्छे

दकत्वात्तदनतिरिक्तवृत्तित्वस्य द्रव्यत्वेसत्त्वादतिप्रसंगः॥ तदवच्छिन्नाभाववत्संबंधस्वविशिष्टसात्मकत्वेनोक्तेरेतु स्वत्वप्रवेशा
त्तत्साध्यकतत्साधनकयावदुपाधिसाधारण्यमित्यवरसो वर्द्धतीत्यनेन सूचितः रूपादीतिकं पक्वव्यवहारमतिक्राप व्यभि
चारित्वाय कत्वामात्रेरणोवोपाधित्वेन संग्राह्यत्वइत्यर्थः पृथिवीत्वाभावात्मकस्यानधीकरणीभूतसाधनाधिकरणं पृ
थिवीतद्वृत्तिधर्मावच्छिन्नसाध्यस्य पृथिव्यां सत्त्वेन पृथिवीत्वाभावस्य तद्व्यापकत्वापूर्वोक्तलक्षणास्यतत्राभावात्त
त्साधारण्यार्थमाह स्वविशिष्टेत्यस्यमुपाधित्वेनाभिमतं। तत्र विशिष्टं यत्साध्यं तदनधिकरणं यत्साधनाधिकरणं तद्वृत्ति
धर्मावच्छिन्नेत्यर्थः॥ रूपवान्द्रव्यत्वादित्यादौतु पृथिवीत्वाभावविशिष्टरूपानधिकरणीयद्वायोदितद्वृत्तियद्वायुत्वा
न्यतरत्वंतदवच्छिन्नरूपकत्वमस्त्येव पृथिवीत्वाभावस्येति नासंग्रहः॥ साध्यानधिकरणसाधनाधिकरणवृत्ति
धर्मावच्छिन्नसाध्यकेत्यावुपाधिशरीरे भानश्च व्यभिचारमानं स्यादित्यतस्तन्निरकारणार्थं स्वविशिष्टेति साध्यविशेष
णं विशिष्टाभावस्यापादकं वह्निमान्धूमादित्यत्र महानसत्वादिरपि स्वविशिष्टसाध्यानधिकरणसाधनाधि
करणपर्वतादिवृत्तिधर्मावच्छिन्नसाध्यसमानाधिकरणत्वादतिव्याप्तिरतो व्यापकत्वपर्यंतम्॥ दूरगुरुरूपादि
न्यत्वपक्षपृथिवीत्वाभावादावतिव्याप्तिवारणायाह अत्रचेति पूर्वदलेति स्वविशिष्टसाध्यानधिकरणं पत्साधनव्यत्क अ

शि॰टी॰म

२४

धिकरणं हन्निधर्मावच्छिन्नसाध्यव्यापकत्वं न तु साधनव्यापकत्वमित्यर्थः पृथिवीत्वाभावविशिष्टगुरुत्वानधिकरणं रूपाधि
करणं द्विविधं पृथिवी तेजश्च॥ तत्र पृथिवी हन्निधर्मावच्छिन्नगुरुत्वव्यापकत्वं पृथिवीत्वाभावस्य नास्तीति तेजो हन्निजल
तेजोन्यतरत्वावच्छिन्नसाध्यव्यापकत्वेति तेजोहन्निरूपस्य पूर्वदलप्रविष्टत्वात्तद्व्यापकत्वादेव नातिव्याप्तिरिति भावः॥ ननु व्य
तिरेकेण रूपे साध्ये पृथिवीत्वाभावस्य ग्रहः न तु रूपेण गुरुत्वे साध्ये इत्यत्रैव किं बीजमत आह विवेचयिष्यत इति तत्र रूपत्वस्य हेतो
रेकतयाऽग्रहे गुरुत्वे तस्य पृथिवीत्वाभावव्यभिचारेण रूपव्यभिचारानुमानसंभवात् रूपकत्वाद्बीजं संभवति अत्र तु पृथिवीत्वा
भावव्यभिचारि पृथिवीरूपं तत्र न गुरुत्वव्यभिचारि गुरुत्वव्यभिचारी पत्रे तेजोरूपं तत्र न पृथिवीत्वाभावव्यभिचार इति रू
पकत्वाद्बीत्वाभावादिवाल्लक्ष्यत्वमिति॥ प्रकृतलक्षणस्य च घटितत्वेनाननुगमात् पृथिवीत्वाभावसंग्राहकत्वाप
क्षे पूर्ववत्तत्साध्यकत्वतत्साधनकयावदुपाधिसाधारणलक्षणान्तरमाह साध्यसमानाधिकरणधर्मस्येति पूर्वलक्ष
णे तु रूपवान् द्रव्यत्वादित्यत्र साध्यसमानाधिकरणस्याधिकरणं यत्साधनाधिकरणं बाधादित्यत्रैव। भावप्रतियो रामा
गित्वाभावादेव पृथिवीत्वाभाववारणं अत्र तत्साध्यसमानाधिकरणधर्मस्य समानाधिकरणं यत्साधनं द्रव्यत्वं त
त्समानाधिकरणाभावप्रतियोगित्वस्य च सत्त्वादेव नातिव्याप्तिरिति॥ सर्वत्र पदव्याहन्निः॰ पूर्ववद्दृष्टव्याहूदृष्टि द्रव्यत्वेति

नोपाधितावारणाय साध्यसमानाधिकरणहन्नीति अस्यापि पूर्ववन्निष्कृष्टोर्थः पृथिवीत्वाभावस्यासंग्राहकत्वे संग्राहकत्वे
च निरुक्तलक्षणायोगेनैव व्यभिचारानुमानसौकर्यं दर्शयति एवं चेति निरुक्तप्रकारेणोपाधेर्ज्ञानं तदुत्पत्तेः साधनवती
ति पूर्वनिरुक्ताभिप्रायेण साधनेवेति। साध्यसमानाधिकरण प्रकृताभिप्रायेण साध्यसमानाधिकरणधर्मास्थि
त्यादिना साध्यव्यापकाभावपरिग्रहः तत्सामानाधिकरण्येनेति॥ साध्यसमानाधिकरणपतेनेत्यर्थः साधनवान् साध्या
भाववान् साध्यसमानाधिकरणधर्मात् साधनं साध्यव्यभिचारि साध्यसमानाधिकरणधर्मस्य समानाधिक
रणत्वादिति क्रमेणेदं बोध्यम् इदं तु नोध्यं उपाधिशरीरभाने साधनवृत्तित्वस्यादौ वा साध्यसमानाधिकरणधर्मस्य सा
ध्यसमानाधिकरणधर्मसमानाधिकरणत्वस्य वा भानेन तदुभयोः वनैनेवाऽभिमतसिद्धेस्तद्घटितोक्तोपाधिलक्षणाव
च्छिन्नस्येवोपस्थापनं व्यर्थमिति तज्ज्ञकथकसंप्रदाय एव शरणमिति सुधीभिरस्फुटतायां लिखिति॥ उपाध्युपन्यासानन्तरं व्यभिचा
रानुमानं तु सिषाधयिषयाधीनमिवेति भावः॥ अव्यभिचरितसामानाधिकरण्यरूपव्याप्यत्वस्याभावभाने व्यभिचा
रमानान्तरश्चं भावात्सिद्धा बाधाधीनपक्षत्वयापि व्यभिचारानुमानं समर्थयितुमाह साध्यव्याप्यत्वेनेति लक्ष
णं लिस्यादेः पोनहत्समनन्नाह पर्यवस्यतीति व्यभिचारित्वापकतामयोजकेति इदं च लक्षणमितस्य व्यभिचारोन्नायक

शि॰टी॰ ७म
२५

तावच्छेदकमित्यर्थः प्रतीकमङ्गलम् व्याप्तेरिति मदर्शिताघेमित्यनेनान्वयः व्यापकव्यभिचारस्य व्याप्यव्यभिचारव्याप्यत्वादितिभा
वः उत्तरं प्रतीकं पक्षधर्मताप्याः इति साधनाव्यापकव्यभिचारस्य साधनेसत्वादितिभावः नचमहानससत्वावच्छिन्नव्यहि व्यभिचारानु
मापकत्वपातस्तिप्रसंगस्यादोषत्वात् विशिष्टसाध्यव्यापकोपाधिस्थले विशेषणाव्यभिचारित्वेनभिन्नेविशिष्टव्यभि
चारनिर्णयस्य विशेष्यव्यभिचारपर्यवसानेनशुद्धसाध्यव्यभिचारसिद्धिसंभवादित्यरुचेः व्याख्यायामपरम्भकांतरमाह ए
वंचेति पद्यभिचारेणेत्यादेर्लक्षणरूपलिंगेत्यर्थः ए तत्साधननिष्ठेति उन्नायकव्यभिचारिविशेषणं कथमस्येति यद्यप्युन्ना
यकत्वं तद्धोघ्यातासाव्याप्तिपक्षधर्मतारूपा तथाप्युन्नायकतावच्छेदकत्वेनैवतस्य प्रवेशो न तु तादृष्येणेति भवत्साकांक्ष
तिभावः व्यभिचारानुमानमपीतिअन्यथाऽपमत्रोपाधिरित्यस्याप्यवनैनैववादिनिग्रहाद्व्यभिचारेणमानोभ्रावनेःर्थ्यो
तरंस्यादितिभावः।लक्षणंत्विसस्यापदार्थव्याख्यानमेवास्यासौभिन्नात्वित्यनेनसूचितः।।संयोगवदन्यत्वेनेति इत्थंसत्वादि
मत्रसंयोगाभावस्यकेवलान्वयित्वयाद्रव्यत्वाभावाऽसाधकत्वेपिसंयोगवदन्यत्वस्यसाधकत्वेनोपाधित्वव द्रव्यत्वाभाववान् रामा
सत्वादित्यत्रापिसंयोगाभाववदन्यत्वस्यापतिघ्यासाध्याभावासाधकत्वेपिसंयोगाभावाभावस्यसंयोगस्यतत्साधकत्व
संभवात्तस्याप्युपाधित्वमचितंमएकवर्षोस्यानयोरेकस्यैवोपाधित्वेनापत्स्येपिवंरूपस्यतस्यापि संयोगाभावस्यापिअस

ष

घातथाविधान्योन्याभावयोरेवसाधकत्वेनोपाधित्वेसंयोगस्याप्युपाधित्वंनस्यादितिभावः।।संयोगाभावस्यसाधनव्यापकत्वा
त्पर्यवसितेस्यादिलक्षणव्याप्तिरतआह लक्षणंत्विति।।तादृशप्रतियोगिनः प्रमेयत्वादिनोपाधित्वनिरासायप्रतियोगितावच्छेदके
तिसंयोगवदन्योन्याभावेसंयोगस्यातत्प्रतियोगित्वात्तद्व्याप्तिरतआह प्रतियोगित्वमिति।।तादात्म्येनप्रतियोगिपदान्योन्याभावस्याभा
वइत्यतआह कस्यादितंचेति तादात्म्यस्याधिकरणत्वानियामकत्वात्प्रतियोगिनि प्रतियोगितावच्छेदकस्याधिकरणत्वात्तःकम
त्वात्तस्याभावत्वमात्रकत्वमनेनलाघवमितिभावः शेषमिति इदं ते ज्ञो द्रव्यत्वादित्यत्र जात्यभावादौ विहितुं गतिव्याप्तिवारणाय
साध्यसमानाधिकरणत्वं विशेषणदेयमित्यर्थः ननविशिष्टव्यभिचारित्वेतत्साध्यतायांकथं शुद्धसाध्यव्यभिचारसिद्धिः
व्यापकतावच्छेदकप्रकारेणैवव्यापकस्यानुमितेनुभमादतआह साम्यास्मतइति विशिष्टव्यभिचारित्वंहिविशेषणविशेष्य
व्यभिचाराम्मकं तत्रविशेषणव्यभिचारित्वरूपैकविशेषबाधेविशिष्टव्यभिचारसिद्धिरेवविशेष्यव्यभिचारित्वलेनतद्धिषणी
करोतीति प्राचीनमतेनेदमितिभावः।।भावयति जनयाति।। ननुसाधनवतिसाध्याभावानुमानमेवव्यभिचारानुमानं विशि
ष्टसाध्यव्यापकंभावेनकथंनिर्वास्त्वविशिष्टाभावस्यातिरिक्तत्वेनविशेष्याभावस्यविशिष्टाभावत्वरूपव्यापकतावच्छेद
कानवच्छिन्नत्वादतआहानचातिरिच्यतइति स्वमतेति एकविशेषबाधेपिव्यापकतावच्छेदकप्रकारेणैवविशेषांतरानुमानेन

शि॰टी॰ प्र

२६ तुविशिष्टव्यापीति स्वमतं ॥ उद्भूतरूपस्पर्शान्यतरवत्त्वेन न द्रव्यप्रत्यक्षत्वव्यापकत्वमतः कथं तदभिप्रायेणेदं व्यभिचारानुमानमत आ
ह प्रत्यक्षसंख्येति यथाश्रुतमेवेति द्रव्यप्रत्यक्षत्वव्यापकेति पदं यथाश्रुतमेव साधिम्यर्थः नन्वात्मैकत्वपरिमाणयोः प्रत्यक्षत्व
नये तयोरपि न द्रव्यप्रत्यक्षत्वव्यापकत्वमत आह आत्मैकत्वादेरपीति इदमुपलक्षणम् आर्द्र निरवासवंशादेर्दूरत्वादिदोषतन्त्र
मजनकदोषस्थले च परिमाणस्यैकत्वस्य ग्रहे एव तद्वान्तरवैजात्यस्य परं न ग्रहः प्रत्यक्षत्वं स्वेन रूपयोग्यत्वं ह्यादिमत्त्वे वा पाधिरिति
बोध्यं अग्रे उद्भूतरूपस्यैवोपाधित्वप्रदर्शनात्तदनुसारेणाह उद्भूतरूपेति साध्यहेतौ चेति साध्ये प्रत्यक्षपदस्य मात्मपर
त्वे आत्मत्वादौ व्यभिचारः हेतौ च सामान्यपरत्वे उद्भूतरूपस्य द्रव्यप्रत्यक्षाव्यापकत्वादसिद्धिरिति भावः एतत्कल्पे च वा
युर्बहिरिन्द्रियप्रत्यक्ष इति स्थापनानुमान वृथैवास्मिन्कल्पे संकोचकल्पनाभयादरुचिं भावयन्नाह द्रव्यपदे वेति अत्रा
पि आत्मत्वादौ व्यभिचारवारणाय प्रथमस्य ॥ उद्भूतरूपे द्रव्यप्रत्यक्षत्वव्याप्यत्वादसिद्धिवारणाय द्वितीय द्रव्यपदस्य व
हिर्द्रव्यपरत्वं वहिष्ट्वमात्मभिन्नत्वं नन्वत्र कल्पे महत्त्वसामान्यस्य दृष्टान्तत्वं न संभवति तस्यात्मभिन्नद्रव्यत्वव्यभिचारित्वा रामा
दत आह महत्त्वपदं चेति जन्यमहत्त्वेति यद्यपि जन्यमहत्त्वसामान्यस्यापि न दृष्टान्तत्वं घटादिमहत्त्वे उद्भूतरूपव्यभिचाराभा
वेन हेतुत्वसंभवात् स्वरूपादिनिष्ठमहत्त्वपरत्वे च महत्त्वपदस्यैवाहल्पतमत्वमस्तु किमन्तर्गडुना जन्यमहत्त्वपरत्वोपवर्णनेन त

तथापि व्याप्यपदमव्यभिचारित्वपदं चान्वयितावच्छेदकावच्छेदेनैव स्वार्थान्वयबोधपरमिति धूमो वह्न्यव्यभिचारीतिवद्द्रव्यत्वस्याव्यभिचारि
त्वमुपयोगात् तथा च महत्त्वत्वरूपेण दृष्टान्तत्वे योगे महत्त्वत्वावच्छेदेनैव बहिर्द्रव्यत्वाव्यभिचारित्वाभावेनानन्वय एव स्यादतो जन्यमह
त्वपरत्वमुक्तं जन्यमहत्त्वत्वावच्छेदेनैव बहिर्द्रव्यत्वाव्यभिचारस्य तत्सामानाधिकरण्येनोद्भूतरूपव्यभिचारस्य च संभवात्तेन रूपेण दृष्टा
न्तोपन्यासेनानन्वय इत्यभिप्रायेण तथा व्याख्यातमिति भावः ननु व्यापकव्यभिचारित्वं यदि व्यापकप्रतियोगिकाभाववद्वृ
त्तित्वं तदा द्रव्यत्वावच्छिन्नाभावमादाय तद्रूपत्वादौ व्यभिचारः यदि च व्यापकत्वावच्छिन्नाभाववद्वृत्तित्वं तदाऽसिद्धिः सत्त्वादेरपि न
व्यापकत्वादत आह व्यापकेति तादृशव्यापकतावच्छेदकमुद्भूतरूपत्वं तदवच्छिन्नाभाववद्वृत्तित्वस्य प्रत्यक्षस्पर्शाश्रय
त्वे सत्त्वान्नासिद्धिरिति भावः न च द्रव्यपदेति प्रत्यक्षव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वस्यैव व्याप्यत्वसंभवे द्रव्यप
दस्य व्यभिचारवारकतयासिद्धिमात्रवारकत्वादिति भावः स्वच द्रव्यपदेति प्रत्यक्षव्यापकतावच्छेदविशिष्टाभावस्येति
॥ प्रत्यक्षत्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य द्रव्यप्रत्यक्षत्वसमानाधिकरणात्यन्ताभावप्रतियो
गितावच्छेदकत्वाभावस्यातिरिक्तत्वादित्यर्थः ॥ प्रत्यक्षत्वव्यापकतावच्छेदकरूपावच्छिन्नाभावाद् द्रव्यप्रत्यक्षत्वव्यापक
तावच्छेदकोद्भूतरूपत्वाद्यवच्छिन्नाभावस्यातिरिक्तत्वादित्यर्थ इति तु कश्चित् तत्त्वं द्रव्यपदार्थस्य प्रतियोगितावच्छे

शि॰टी॰भो
२७

दकुकोरिवविषत्वाभावेनावशिष्टाभावस्येति यथा विरोधादिति तादृशव्यापकतावच्छेदकत्वेनोभयत्रूपत्वादेरज्ञानेप्रकृतहे
तोरेवदुर्ज्ञेयत्वं तत्तज्ज्ञानेच तत्तथैवहेतुकरणमुचितमित्याशयेनाह द्रव्यत्वेति अव्यभिचारेश्चेति मूलस्थेनसरलत्वमूलमनिवारणि
तंव्याचष्टे इदंत्वाव्यभिचारइतितथाचनशेषवैयर्थ्यमितिभावः ननशाकपाकजत्वस्यसंदिग्धोपाधिमध्येवक्ष्यमाणत्वाव्यभि
चारानुमानहेतोस्वरूपासिद्धिसंदेहइत्यत आह अनुमानमिदमिति साधनविकलोपमिति अन्वयदृष्टांतत्वसुरासाय॥साध्य
वानितिव्यतिरेकदृष्टांतत्वसुरासाय एवं॥मित्रातनयत्वव्यापकत्वस्यसत्वेनार्थत्वे ध्वंसप्रागभाववदिति व्यभिचारि
त्वनिष्टव्याप्तिस्तद्बुद्धिंविनादुर्ग्रहत्वाघटत्वस्यादिप्रायेणावैयर्थ्यमितिभावः विशेषितं सामानाधिकरण्येनव्यापकत्ववि
शेषितंहत्रिमत्वमिति व्यभिचारित्वेहत्रिमत्वस्यविशेषणत्वादिति फलतइति यत्किंचिदधिकरणनिष्ठात्यंताभावप्रतियो
गित्वबुद्धे१ सामानाधिकरण्यबुद्धिफलत्वादितिभावः॥नन्वेवंश्यामत्वेव्यभिचारस्तस्यापिमित्रातनयत्वसमानाधिकरणस्य
शाकपाकजत्वव्यभिचारिणिःश्यामत्वव्यभिचाराभावादत आह तेनापमर्थइति पत्रद्वैयोरननुगमान्निष्कर्षमाह मित्रा
तनयेइति तेनेति श्यामत्वस्यमित्रातनयेशाकपाकजत्वव्यभिचारित्वंनास्ति किंतुकाकादावितितद्व्युदासःमत्तांतरमाह अत्र समा
व्यभिचारश्चेति शेषवैयर्थ्यभयादाह वक्रव्रीहिरिति मित्रातनयत्वमव्यभिचरित्वापंकपस्येतिवक्रव्रीहिरित्यर्थः मित्रातन

यत्वव्याप्यत्वंचफलितार्थः इदंतुश्यामत्वादेरव्यभिचारवारणाय॥दृष्टांतासिद्धिनिरासायाहयदिति इदंगगणवत्त्वघटत्वादिसत्ताध
टत्वमघटत्वाव्यभिचारित्वेसतिश्च घटत्वावच्छिन्नगगणवत्वव्यापकघटभिन्नत्वमत्वव्यभिचारिश्चयथचगगणवत्त्वव्यभिचारीसघट
त्वंदृष्टांतइत्यर्थः यथाश्रुतान्यभिचारित्वेनैवसामंजस्येव्यभिचारपदस्यव्यापकत्वमर्थंकल्पयित्वापुनर्वक्रव्रीहिणाव्या
प्यत्वेपर्यवसानंसंदर्भविरुद्धमित्यस्वरसआद्रुतिलिखनेनसूचितः विशिष्टसाध्यव्यापकोपाधिस्थलीयव्यभिचारानुमानेहे
तोविशेषणांशव्यभिचारित्वेसतीत्यस्यविशेषणवत्त्वार्थकरणस्यफलोत्तरमाह मेयत्वादावपीति वायुःप्रत्यक्षःप्रमेय
त्वादित्यत्रप्रमेयत्वस्यवहिर्द्रव्यत्वाव्यभिचारित्वाभावेपिप्रमेयत्वेप्रत्यक्षत्वव्यभिचारिवहिर्द्रव्येरूपनतूपव्यभिचारित्वा
त्पनेनव्यभिचारानुमानंसुकरमितिभावः एवंउक्तक्रमेण उपाधित्वे उपाव्यवहारविषयत्वं सोक्तालंपरेणेतिवि
शिष्टसाध्यव्यापकव्यभिचारेणविशिष्टसाध्यव्यभिचारस्तेनचकिंचिद्विशिष्टेनशुद्धसाध्यव्यभिचारःसाधनीय
इतिपरंपरयेत्यर्थः नदुन्नायकत्वमेति शुद्धसाध्यव्यभिचारोन्नायकतयेत्यर्थः तथात्वं उपाधिव्यवहारविषयत्वं पूर्ववद
दितितेनोइत्यत्वादिसाधेप्रागुक्तरीत्याव्यभिचारोन्नायकस्यशोभावादिवारणायेत्यर्थः व्यभिचारोन्नायकत्वंपदिसाध
ननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगित्वंतदासाधनव्यभिचारीतस्यवैयर्थ्यमितस्ततोप्याचष्टे व्यभिचारेतियत्र

१

कुत्रचिदिति साधननिष्ठत्वं न विवक्षितमिति भावः एवंच साधननिष्ठत्वस्याविवक्षणे च साधनव्यभिचारित्वस्य यथाश्रुतस्य
पृथिवीत्वव्यभिचारिणि रूपवत्त्वे सत्त्वादाह वह्नीहीरिति साधनेऽव्यभिचारियस्येत्यर्थः एवमपि वह्नीहीरेण साधनाव्या
पकत्वात्फलधनेपि जलमित्यादिति जलत्वादेर्व्यभिचारवारणाय साधननिष्ठमिति रसवत्त्वनिष्ठपृथिवीत्वव्यभिचा
रित्वं च न गुणत्वव्यभिचारोन्नायकमिति भावः उक्तिवैचित्र्यादिति साधनविशेष्यकसाध्यव्यभिचारोन्नयनयोग्यपदव्यभि
चारित्वमिति पूर्वलक्षणार्थः तत्र योग्यतापदार्थमुद्दृश्य साधननिष्ठत्वयव्यभिचारित्वेलक्षं अत्र साधननिष्ठयव्यभि
चारित्वमिति शब्दादेव न स्पष्टाभऽव्यापकत्वमयी स्याच्च साध्यव्यभिचारित्वमात्रव्याप्यत्वे स्पष्टाभ इत्युक्तिवैचित्र्यमि
तिभावः तद्व्याप्यतिव्यभिचारव्याप्यत्व्यर्थः कोटिप्रविष्टतेति उपाधिव्यभिचारित्वस्य साध्यव्यभिचारव्याप्यतायामुपा
धिसाद्यवच्छेदककोटिप्रविष्टत्वादिति भावः मात्रेणेति ननु व्यभिचारोन्नायकव्यभिचारप्रतियोगित्वेनेत्यर्थः इत्थंचोक्त राम
रूपव्यभिचारोन्नायकत्वस्याविवक्षणे च स्नेहव्यापकत्वात् स्नेहसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदक
त्वे सति हस्तिमत्त्वात् एतेन प्रमेयत्वादिना स्नेहव्यापकत्वाप सर्वत्रैव सत्त्वाद्व्यभिचार इति परास्तं स्नेहस्य जलत्वाव्य
भिचारित्वापाधाशङ्क्य साधनव्यभिचारित्वेनापि वारणसंभवाद्वह्निव्रीह्याश्रयणफलत्वं वर्णयितुमुदाहरणान्तरमाह

घटेनैवेति जन्यद्रव्यत्वादिति घटत्वव्यभिचारित्वं हि घटत्वाभाववत्समवेतत्वं तच्चानित्यद्रव्येतरभावाद्व्यभिचारवारणाय ज
न्येति घटरूपादौ व्यभिचारवारणाय द्रव्येति द्रव्यत्वे घटव्यभिचारित्वस्य सत्त्वात्साधनव्यभिचारिपदस्येति वह्नीहिरण्यप
रणीय इति भावः व्यभिचारोन्नायकस्य तद्व्याप्यकोटिप्रविष्टस्य साध्यसमानाधिकरणेति तेजोद्रव्यत्वादित्यत्र स्पर्श
सामान्याभावस्य विनुद्धस्य तादृशकोटिप्रविष्टत्वाभावेनैव वारणसंभवात्तन्नोक्तं साध्यसामानाधिकरण्यं च साधनेऽव्या
पकतानियामकसंबंधेन बोध्यं तेन संबंधान्तरेण साध्यसमानाधिकरणत्वेपि शब्दादेर्न क्षतिः इत्थं च शुद्धेतोः सा
ध्यसमानाधिकरणस्य साधनाव्यापकस्य वारणपरं व्यभिचारोन्नायकत्वमुक्तं तत्र प्रकृतसाधने साध्यव्यभिचा
रानुमितिजनकतावच्छेदकव्याप्यवच्छेदककोटिप्रविष्टत्वं सद्धेतोश्च साध्यव्यभिचारानुमितिप्रयोजकासंभवात्तादृ
धर्मव्युदासः इदं गुरुत्वरूपादि तत्र पृथिवीत्वाभावे व्याप्तिकामिमाशंक्य निराकरोति एवं च रूपेणेत्यादिना पृथिवीत्वाभाव
स्य वारणीयतामप्रयोजकं रूपमादर्शयति गुरुत्वेति गुरुत्वव्यभिचारिपत्रेत्यंशं रूपं तन्निष्ठव्यभिचारप्रतियोगिन इत्य
र्थः पृथिवीत्वाभावव्यभिचारिणि पृथिवीरूपे गन्धत्वव्यभिचाराभावात् रूपत्वव्यभिचारिणि तेजसरूपे पृथिवीत्वाभावव्य
भिचाराभावाद्व्यभिचारोन्नायकत्वाभावेन तस्यालक्ष्यत्वमिति भावः पत्रेतीयदधिकरणावच्छेदेनेत्यर्थः तत्र तदवच्छेदेन प

शि॰टी॰भ

२८ पृथिवीत्वाभाववत्त्वस्य तत्राऽव्यभिचारित्वजलत्वादीति धीविशिष्टत्वेसत्यादि प्रागुक्तरीत्याव्यभिचारित्वेपि तत्र समस्तवारणाय मुक्तमत
आह यथा कथंचिदिति यत्साधनव्यापकोपाधितिच त्वस्यैवव्याप्यादिह तु तत्पक्षस्य साधनस्य भेदादिति भावः तदुन्नायकत्वं व्यभि
चारोन्नायकत्वं अत्राभावमात्रस्यानुपाधितापत्तिर्वैयर्थ्यान्नस्य व्याप्यतावच्छेदककोटौ प्रवेशादिसखरसः केचि
दित्यनेन सूचितः ॥ मूले ऽर्थान्तरस्येत्यादि तथा चार्थान्तरेणापुनुपपत्त्युपपत्ताविपि परंपराव्यभिचारोन्नायकं तथाप्युपाधेर
नुमानदूषकत्वमक्षतमिति भावः अर्थान्तरत्वमपि नाव्यापाह आभासान्तरस्येति सोपाधौ व्यभिचारादि रामा सस्याव
श्यकत्वादाभासान्तरस्य तत्राभावादित्यसंगतमतः पूरयति शंकितेति तदानीमिति तथा च व्यभिचारस्यास्फुरणेपि उपाधि
मात्रोद्भावनेन वादिनिग्रहात्तस्यावश्यं दोषत्वमभ्युपेयमतस्तस्यापि दोषत्वेनाकांक्षितत्वात्तदुद्भावनेनार्थान्तरमितिभा
वः तन्मूले भावत्वादि किं दोषत्वस्य ध्वंसो विनाशी जन्यत्वादित्यादावित्यादिः उपाधेर्दोषत्वं हेत्वाभासविधया निग्रहस्था
नान्तरत्वेन वा आद्ये तद्दोषस्य व्यभिचारादेरिति उपाधिमानुमितितत्कारणज्ञानं प्रति साक्षाद्विरोधित्वाभावात्त्वाभावा
दिति भावः ॥ तं व्यभिचारादिकं तन्मात्रचकस्य व्यभिचारादिसाधकस्यऽप्राप्तकालत्वमिति तदानीमनाकांक्षितत्वा रामः
दिति भावः परंपरयेति शुद्धसाध्यव्यभिचारसाधकीभूतावच्छिन्नसाध्यव्यभिचारसिद्धिद्वारेत्यर्थः अवच्छिन्नसाध्यव्या

धकस्येति उद्भावनमिति पूर्वेणान्वीयते ननु साक्षात्परंपरासाधारणतत्साधकत्वं तदानीमाकांक्षितमत आह अन्यथेति तत्सा
धकपरंपराया अपि तदानीमाकांक्षितत्वे तथात्वे अप्राप्तकालत्वं द्वितीयं निराकुरुते नचेति विशेषणमिति तत्साधकपरं
पराया निग्रहस्थानत्वाभावादुपाधेश्च निग्रहस्थानत्वात्तेन विशेषणमर्थः तथात्वायोगात् निग्रहस्थानत्वायोगात् विभा
जकेति प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकं अपार्थकं अप्राप्तकालं
न्यूनं अधिकं पुनरुक्तमननुभाषणं अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोग अपसिद्धा
न्तो हेत्वाभासाश्च निग्रहस्थानानि इति सूत्रेणैतेनाज्ञानत्वपासिद्धादीनां निग्रहस्थानत्वमास्ये हेत्वाभासाश्चेत्यत्रो
क्तो इति चात्र सूत्रस्य चकारस्यैवानुक्तसमुच्चयपरतया मिश्रादिव्याख्यानमपाकृतं तत्र यथोक्तत्वस्यैव विधेयत्वा
द्धा साध्यश्च यदिति व्यभिचारस्यैवेति उन्नायकस्येत्यत्र उन्नयनेन्वयितदुभयेति व्यभिचारोन्नायकमात्रस्यासिद्धिन्याय
कं च तदुभयं तथात्वापातात् निग्रहस्थानत्वापातात् कथकसंप्रदायानुरोधादिति कथकानां तादृशव्यवहारः खल्वा
दित्यर्थः तदुद्भावकं उपाध्युद्भावकं पराभवतः अप्राप्तकालत्वेन निग्रहस्थानेन पराभवं कुर्वतः शुद्धसाध्यव्यभिचार
एव न तूपाधिः तत्र प्रकृतसाध्यव्यभिचारे कथं तार्किकं तदित्याकांक्षायां तद्धेतुत्वेन शुद्धसाध्यव्यभिचारहेतुत्वेन विशि

सि॰टी॰म ॥३॥

३०

ष्टसाध्यव्यापकोपाधिस्थले त्वाह विशेषणेनेति विशिष्टसाध्यव्यापकस्य परंपराव्यभिचारोन्नायकत्वेनाह विशिष्टेति अत्र च विशे
ष्यव्यभिचारित्वेऽपि न विशिष्टसाध्यव्यभिचारित्वे हेतौ विशेष्यविशिष्टसाध्यव्यभिचारे प्रथममुपाधेरुपन्यासः समर्थयितुमाद
र्शयन्नेवेति साध्यव्यभिचारव्याप्यत्वेनोपाधिव्यभिचारस्योन्नायकत्वेऽनुमितिम्प्रति प्रतिबन्धकत्वेऽप्युक्तरूपेण प्रथममुपन्यासः सम्भ
तो भवतीति भावः व्यभिचारित्वादिः सर्वं पक्षेतरविवादादुपाधिमात्रनिरूपेप्योपाधिव्यभिचारत्वानिरुक्तं॥ यत्किंचिद्धर्मावच्छिन्नसा
ध्यव्यापकत्वनिश्चयस्य पक्षेतरेऽपि सत्त्वादाह उपाधित्वोपयिके इति स्वान्वयिकारणीभूतसाध्यनैधिकरण्यवृत्तिधर्मावच्छिन्नसाध्य
व्यापकत्वं उपाधित्वौपयिकं तस्यानिश्चयादित्यर्थः ननु पक्षे कथं चिन्ता दृशव्यापकत्वनिश्चयो तादृशस्तत्र स उपाधिस्या
दत्रेष्टापत्तिमाह अनुकूलेति तर्कादिनेत्यादिपदात्स्वतःसिद्धव्यभिचारग्रहादिपरिग्रहः निश्चितोपाधिः उभयोरपि पाधि
त्वनिश्चयो नानुमानदूषकः तथापि सन्दिग्धोपाधित्वस्यापि शङ्कनीयत्वात् निश्चितोपाध्यभिप्रायकत्वमस्पष्टीकर्तुं नि
श्चितेत्युक्तं स्वव्याघातकत्वेनानुपाधावितिम्मूलोक्तयुक्तिं निराकरोति न चेति स्वव्याघातकत्वादित्यस्य अनुमानसामान्ये
तद्व्याघातकत्वेन दूषणापादकत्वमित्यर्थाभिप्रायेणाह तद्धीति स्वव्याघातकेऽत्व हि इत्यर्थः साधारण्यं दूषणापादकत्वं
॥तदभावात्॥ तत्र साध्यव्याप्यव्यापकत्वेन साध्याव्यापकत्वनिश्चयेन पक्षेतरस्य दूषकत्वाभावात् स्वस्वीयस्व रामः

॥।

प्रयुक्तव्यभिचारेणानुमानं तद्व्याघातकत्वं स्वसमानजातीयेन पक्षेतरोन्तरेण तद्दूषणापादकत्वमित्यर्थोऽभिप्रायेणाह तथापीति त
द्व्यभिचारेण पक्षेतरव्यभिचारेण धूमो वह्निव्यभिचारी पर्वतेतरत्वव्यभिचारित्वादित्यत्रापि धूमेतरत्वस्योपाधित्वसम्भवादित्यर्थः अवश्यं
भाविन अवश्यंभावनिश्चयेन तद्योगात् साध्यव्याप्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वनिश्चयेनोपाधित्वायोगात् व्यभिचारानु
मापकव्यभिचारप्रतियोगित्वमुपाधित्वलक्षणं पक्षेतरस्योपाधित्वेऽनुमानमात्रोच्छेदात् व्यभिचारेणानुमानस्याप्युच्छेद इति स्वीयस्वो
पाधित्वलक्षणस्य व्याघातकत्वात् स उपाधिरिति मिश्रव्याख्यामाक्षिपति अत एवेति अनुकूलतर्कादिना साध्यव्यापकताग्र
हे व्यापकव्यभिचारिणि साध्यव्यभिचारावश्यंभावेन व्यभिचारेणानुमानानुच्छेदादेव दूषणं भवत्येवेति भावः॥ निर्युक्तिकः
प्रवादो न श्रद्धेय इत्यस्वरसो वदन्तीत्यनेन सूचितः तत्पर्वतावयवश्चत्वस्य त्वं॥ तस्य पर्वतावयववृत्तित्वात्॥ पक्षस्यैवेति पक्षस्य
व्यावृत्तिः साधनाव्यापकत्वे उपपद्यते पर्वतावयववृत्तिर्व्यावृत्तिरिह नकुत्राप्युपपद्यत इति भावः तथा चोपाधित्वोपयि
कपक्षमात्रीयव्यावृत्तिप्रयोजकं विशेषणवत्त्वादिति मूलार्थः केचित्तु विशेषणवत्त्वादिति न मतुप् किंतु तत्प्रत्ययार्थे वतिप्र
त्ययः तथा च पक्षमात्रव्यावर्तकविशेषणोपस्थितपक्षेतरः साध्यव्यापकताग्राहकानुकूलतर्काभावे न तत्त्वत्वादि
त्यर्थमाहुः॥ तन्न॥ पक्षमात्रव्यावर्तकविशेषणवत्त्वं तादृशेति उपाधित्वोपयिकेत्यर्थः॥ व्यापकतामाह कानुकूलत

कात्वावस्येव पूर्वग्रंथे प्रसक्तत्वात्तत्र सरमशेकत्वेसंगतिरतस्तन्त्यातीयोगिपरत्वमशेकतया व्याचष्टे अत एवेति अत्र धूमे स्वतंत्रेति
आर्द्रेंधनत्वेन वह्नित्वेन च कारणतायां संयोगः प्रत्यासत्तिः परस्परप्रत्यासत्त्या तन्त्राभिवकारणतानां कार्योपधायकत्वादि
त्यर्थः अतः॥ आर्द्रेंधनप्रभववह्नित्वस्य कारणतावच्छेदकत्वखंडनात् आर्द्रेंधनप्रभववह्नित्वस्य कारणतावच्छेदकत्वाभा
वे किं तेन रूपेण व्याप्त्यत्वे केनचिद्रेहनितद्रूपावच्छिन्नव्यभिचाराणामभिचाराद्नुमानं वा आर्द्रेंधनहीनादितत्वात् व्यापकता
वच्छेदकत्वाद्वद्धितीयेतस्वच्छिन्नेति अतिरिक्तत्वेति आर्द्रेंधनत्ववह्नित्वावच्छिन्नाभावाव्याप्तमतिरिक्तत्वयेत्यपेक्ष
त्वाद्गतिमनुक्त्वा तेन रूपेण कारणत्वमपि प्रवस्थापयति सत्यपीति विशेषणान्तरेण आर्द्रेंधनप्रभववह्नित्वेन आ
र्द्रेंमेति दाहं प्रति प्रतिबंधकाभावानां दाहएव कारणत्वस्य क्लृप्तत्वाद्धूमं प्रति तत्कारणत्वस्याक्लृप्तत्वादिति भावः प्रतिबंधका
भावानामिति वह्नौ वचनेन मणिमंत्रौषधादिभेदेन कार्यकारणभावानां बहुत्वं स्यादिति आर्द्रेंधनव्यक्तिभेदेन कार्यकारण
भावस्यानंत्यादिति गौरवं दर्शयति एकस्यामिति तत्रैव तदिंधनमक्त्वाविवक्षण्णांगणात् आर्द्रेंधनव्यक्त्यंतरेण संयोगसंबं रम्भा
धेन धूमोत्पाददर्शनेन एतेन प्रतिबंधकाभावानां कार्ये स्यसंयोगघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारण
भावकल्पनयापि गौरवस्य समाधानं न संभवतीति सूचितं ननु मण्यादीनां प्रतिबंधकत्वे संयोगः प्रत्यासत्तिः मंत्र

स्य चेदं मादृहाणिरित्यादेश्यत्वं कार्यस्य च धूमस्य न संयोगो जन्यतावच्छेदकप्रत्यासत्तिर्व्यभिचारात् किं तूपधायकत्वं तच्च यत्रोपधा
यकता संबंधेन धूमस्तु तत्र संयोगेन तादृशोदृश्यत्विनवा मण्यादिमंत्रयोरभावईसेवतूपसामानाधिकरण्यप्रत्यासत्त्या
कार्यकारणभावस्य कल्पने क एव गौरवं अत एव पत्रेंधनेमण्यादिसंबंधोज्ज्वालेदे वाहूमो न जातस्तत्रानुक्तेसंबंधेनसा
मान्यसामग्रीतो न धूमोत्पादनमन्यथातदिंधनजधूमस्याप्रसिद्ध्योक्तक्रमेण प्रतिबंधकाभावस्य हेतुत्वाकल्पना
त्सामान्यसामग्रीतो धूमसामान्योत्पत्त्यापातादिति चेत् उपधायकत्वादीनां कार्यताघटकसंबंधत्वे मानाभावाद्धूमानुपधा
यकवह्निपुंजे प्रति तुहे धनव्यक्तेः फलाभावेन विशिष्यहेतुत्वाकल्पनाद्धूमोपधायकेंधनानां विशिष्य हेतुत्वकल्पनात्तादृश
शेषसामग्रीविरहेणापि धूमानुत्पादसंभवात्तदेव मपि मणिमंत्रौषधादिभेदेन कार्यकारणभाववाहुल्यस्याति
स्फुटत्वादित्यत एव वह्नित्वेनार्द्रेंधनत्वेन च धूमं प्रति हेतुता तत्र जन्यजनकभावः प्रत्यासत्तिः परस्परप्रत्यासत्त्यानानमिवकारणानां कार्यो
पधायकत्वादिमपास्तं यत्र धूमजनकतावच्छेदकं कोजातिर्वा विशेषएव वह्निनिष्ठ इति तन्न तार्णत्वादिना संकरप्रसंगेन तादृशजा
तिरभावात् न च तृणजन्यतावच्छेदकतया तार्णत्वादिर्नोभावेपि अदोषात्तार्णत्वादिमापकं वेजासमिवाच्यं अनंतानां वेजात्या
नां तदवच्छिन्नं प्रति अनंतानां कारणत्वानां प्रतिबंधकत्वानां च कल्पने अतीवगौरवादार्द्रेंधनजवह्नित्वेनैवोपाधिना कारणत्वक
ल्पनस्यैव लघुत्वात् एवं च तत्तृणेंधनजवह्निना पाकोत्पादिविशेषो भवति यथाहरिद्राचलेन पक्वं हरिद्राजलेन सिक्तं हारिणं मांसम

३२

प्रयोजनस्य धूमाद्यसत्त्वात् तत्र तुल्यत्वायतत्पार्थसारादि विशेषजनकतावच्छेदकत्वेनोपेत्यपाह हरिद्रानलादौ ज्ञानासंकरप्रसंगादिति उक्तानामेक
रूपादिप्रत्यक्षविलक्षणदाहवह्निधूमजनकतावच्छेदकीभूतस्वाभिघोजनत्वादिविलुप्ताः वह्निसंयोगगतजातिविशेष एव कल्प्यते दाहप्र
तिबंधकत्वेनाभिमतानां तद्व्यवच्छिन्नं प्रत्येव प्रतिबंधकत्वं कल्प्यते न परस्परादिभेदेन दाहस्य नानात्वाद्दाहेयत्वादौ च तत्प्रतिबंधकत्वकल्पने
कार्यकारणभावद्वयकल्पनप्रसंगादित्याकूतः मूलानुसारिणा युक्त्यंतरमाह महतीति आर्द्रेंधनत्वेन वह्नित्वेन च धूमं प्रति हेतुत्वे तद्व्यक्तिनप्रक
र्षादेव महत्त्वं धूमेऽस्त्विति वाच्यं महत्त्वेनेत्यार्द्रेंधनप्रभवमहत्त्वं वह्नेरनुसारे महत्त्वं धूमानुसारात्त्वेन हेतुत्वादिति समुदायापेक्षया
ह प्रतिबंधकाभावस्यापि सत्त्वं दर्शयितुमाह तत्प्रभवे चेति वस्त्वंतरे आर्द्रेंधनजवह्नौ वर्तते सखदरसोऽस्त्वावेन तद्वीजं तु धूमस्य प्रकर्षे
न जातिविशेषः किंतु महत्त्वातिशयः स च न कार्यतावच्छेदकः धूमस्य स्वकारणमहत्त्वमहत्त्वस्य चावयवगतमहत्त्वातिशयादेवो
त्पत्तेरित्यादिकमिति मूलानुक्रममपि न्यूनतामेवापयूरयति आर्द्रेंधनप्रभववह्निसामान्यमिति तादृशेति आर्द्रेंधनप्रभवेत्यर्थः
अर्थवशसंपन्नमिति वह्न्यार्द्रेंधनयोर्धूमजनकयोरेव जन्यजनकभावः प्रत्यासत्तिरित्यभिप्रायः फलितमिति आर्द्रेंधनप्रभववह्नि रामा
त्वेन व्यापकत्वस्योभयव्यापि संभवादिति भावः ॥ तादृशान्वयेति उद्भूततद्रूपवत एव वह्निद्रव्यस्य प्रत्यक्षत्वेन तु तद्रूपस्य स्वविषयकमा
कारकेत्यर्थः तत्त्वपुनरिति वह्निद्रव्यस्य मूर्त्तस्य वा प्रत्यक्षं प्रति लाघवादुद्भूतरूपत्वेन कारणत्वं तेन प्रत्यक्षस्य विषयतानुपप
समवायद्रव्यत्वद्रूपसामानाधिकरण्यप्रत्यासत्तिः विषयस्य च सामान्यतो विषयत्वेन विशेषणतत्त्वव्यक्तित्वेन प्रत्यक्षे हेतुत्वं

ननु पाकानेव विषयनिष्ठो धर्मस्तेनेत्यादि प्रागेवोक्तं इत्यर्थः मूलेवैधर्म्यादिति श्यामत्वे शाकाद्याहारपरिणामस्य प्रयोजकत्वादेव पकेन प्र
तिपादनादिति भावः ॥ घटोत्पत्तेः स्वरूपेति ध्वंसप्रागभावेति जन्यत्वेन विनाशित्वे साध्ये घटध्वंसस्यापि ध्वंसः प्रसज्येत तथा च तत्रानी
घटध्वंसस्य प्रागभावस्य वा सत्त्वेऽकल्यामि बलात्तद्घटसत्त्वप्रसंगः इति भाव न च प्रागभावस्येति अन्यथा प्रागभावध्वंसस्य प्रति
योगिनो ध्वंसकालित्वप्रसंगे प्रागभावोन्मज्जनं स्यादिति भावः प्रतियोगिध्वंसोत्पत्त्या प्रागभावस्य ध्वंसस्त धाध्वंसध्वंसोपि प्रतियो
गिध्वंसस्यापि च तत्काले प्रतियोगिध्वंसानधिकरणत्वमेव नास्तीति तत्र दुन्मज्जनमिति भावः ॥ असामग्रिकेति । नव्वजन्यभाव
त्वापि क्षपालाघवाज्जन्यत्वेनैव ध्वंसं प्रति कारणत्वकल्पने सामग्रीबलाद्ध्वंसस्यापि ध्वंसः फलमुखगौरवस्यादोषत्वादिति वा
च्यं ॥ तथापि प्रागभावप्रतियोगित्वरूपजन्यत्वाच्छाघवेन सत्त्वेनैव ध्वंसहेतुताया उचितत्वान्नित्यस्य व्योमादेरसमवायि
कारणनाशाभावादुत्पन्नाश्रयनाशविरोधिगुणप्रारम्भाभावेन विशेषसामग्रीविरहेण विनाशोपपत्तेः पाकस्यापार्थि
वरूपादिनाशकत्वादन्यथा जन्यत्वेन हेतुत्वेऽपि पाकाज्जलनेत्रोवयविरूपादीनां विनाशः स्यात् यदि च कालिकसं
बंधेन सत्त्वावच्छिन्नं प्रति समवायेन तद्धेतुत्वेन लाघवं कालिके न तद्धेतुत्वं ध्वंसस्याधारता न तस्यापि विनाशस्य।

शि॰टी॰म

३२ पार्थेति तद्विशेषसामग्रीनिरपेक्षस्तन्मात्रस्य ध्वंसप्रयोजकत्वे जन्यमात्रस्यैव क्षणिकत्वापत्तिः विशेषसामग्र्यपेक्षणे
च द्व्यणुकादिविध्वंसे फलाभावेन विशेषसामग्र्यकल्पनान्न तस्य विनाश इति अत एवाह अप्रामाणिकध्वंसेतरकारणाधा
रेति ध्वंसानंतत्वेति ध्वंसस्याविनाशित्वमित्यर्थः॥ शाकपाकजलादेः कारणस्यापि व्यापकत्वोपदर्शनात्कार्यकारण
योरेवैतत्सशंकनमनर्थं तं मनोऽव्याचष्टे कार्यकारणभावमाह केति तत्कोटीकृतत्वं नियमतत्तज्जन्यप्रमितिविषयत्वं
तच्च कार्यकारणयोस्तत्वयोरव्याहतमितिभावः॥ मलेत उपजीव्येति नचु द्व्यणुकत्वेन गगनादेः परिमाणकत्वानमाने
कथं कार्यकारणभावउपजीव्य इति वाच्यं॥ घटादेः परिमाणकत्वव्याप्तिनिरुपाधिसहचारग्रहएवतत्र दृष्टान्त्यौ सौम्यत्वं
घटादेः परिमाणसत्वे चावयवगतमहत्वावद्रूलादीनां तत्कारणत्वकल्पनमेवमूलमित्यादि रीत्या सर्वत्रैव तस्योपजीव्य रम्य
त्वादिति तत्रान्यसमर्थीत्वं निरुपधिसहचारादिकमुपजीव्येति भावार्थः नन्वभिहितमेव मूलेस्वव्याघातत्वमित्यत आ
ह स्वव्याघातकत्वं चेति तिरस्कृतमेवेति तद्वीन सर्वानुमानसाधारणमित्यादिना शंकापिशाचित्वादिति शंका
सुगध्येसर्वत्र संभावितत्वेन पिशाचितुल्यत्वादित्यर्थः व्यभिचारशंकाधानप्रयोजकशंकासत्वेतदाधारनमावश्यकमित्या

र पेनाहत्तदाहितापीति पक्षेतरोपाधित्वशंकाहितापीत्यर्थः प्रसंगमात्रेति मात्रपदेन कार्यकारणभावादिव्युदासः का
नमानानां गगनपरिमाणावद्धत्वादित्यादीनां विलयप्रसंगादिति सर्वत्रैवपक्षेतरोपाधित्वशंकायाः संभवेनिरुपाधित्वाप्रसि
द्धेरितिभावः अथाप्रकाशिदित्यादिग्रन्थमवतारयत्युपतिसंदिग्धोपाधीति साधनाव्यापकत्वे संदेहे व्यापकव्यभिचारित्वस्य साध
्यभिचारव्याप्यत्वात्तत्संदेहेन व्यभिचारसंदेहः साध्यव्यापकत्वसंदेहे साधनाव्यापकव्याप्यत्वस्य साधनाव्यापकत्वव्याप्यत्वा
त्संदेहेन साध्येसाधनाव्यापकत्वसंदेहस्तत्प्रयोजकः स्वपक्षसाध्यतेसाध्यव्यभिचारव्याप्यसंदिग्धव्यभिचारप्रतियोगित्वे सा
ध्येसाधनाव्यापकत्वेस्याव्यसंदिग्धव्याप्यत्वप्रयोगित्वं पक्षेतरे व्यक्तीत्यर्थः प्रयोजनमते अनुमानविलपनप्रथाः नदाहि
तापीत्यादिद्वितीयपक्षमवतारयति व्यभिचारज्ञानत्वेनेतिकारणेति पक्षेतरज्ञानातिरिक्तकारणेनेत्यर्थः अजन्यत्वादिकाभि
त्यादिना पक्षीयव्यभिचारसंशयान्यत्वपरिग्रहः ननु पक्षेतरोपाधित्वशंकाहितव्यभिचारशंकासत्वेपिव्याप्तिग्रहप्रतिबंधा
भावात्तथान्वयव्यतिरेकानुविधानमेवाभावात आह कथमन्यथेति अन्यथा पक्षेतरोपाधित्वशंकाघटजन्यत्वस्य पक्षीयव्य
भिचारसंदेहान्यत्वस्य व्यवनिवेशने कस्य वह्निसंयोगमात्रस्य पक्षत्वे संयोगान्तरेप्रसाक्षिरिक्तव्यभिचारसंदेहस्य संयोगान्यत्वस्य
पक्षतावच्छेदकावच्छिन्नभिन्नत्वरूपपक्षेतरत्वादत्त्यशुद्धसाध्यव्यापकस्योपाधित्वसंभवादाह सर्वसंयोगेवेति प्रत्य

शि॰दी॰ २४ ह्येवं संयोगधर्मस्य दाहातिरिक्तो भ्रमाभेदे ध्वंसे संयोगावृत्तिर प्रसक्तः संयोगाधर्मश्चैतत्राप्येवाद्यात् पक्षधर्मताबलात् प्रसक्त
संयोगधर्मसिद्धिरित्यर्थः तत्र व्याप्तिग्रहप्रतिबंधकांतरस्याभावात् संशयीय व्यभिचारसंशयः पक्षेतरोपाधित्वशंकाहितव्य
भिचारसंशयस्यानायत्या प्रतिबंधकोभ्युपेय इति भावः निरुपाधित्वेपीति तथा चेतरस्येत धात्वादौ तारोपाधित्वेन स्वीकर्तव्येऽमि
तिभावः अप्रयोजकत्वादिति कार्यकारणाभावादिव्याप्तिग्राहकतर्कस्य सत्त्वादित्यर्थः इतरे त्वागगनं परिमाणवत्प्रमेयत्वादित्या
दीनां तथात्वात् अप्रयोजकत्वात् अत्र चेति पक्षमात्रेति केसाधनवति सर्वत्र साध्यवत्त्वनिर्णयादिति भावः तथा चानायत्या
पक्षीयव्यभिचारसंदेह एवात्र प्रतिबंधक इति पक्षेतरस्यानुपाधित्वे पितदन्यमानानामनुपाधित्वं नो स्यात्तत्राह कथमपि
तिहवनरेति निर्देषेत्यर्थः अन्नत्र इति शुद्धसाध्यव्यापकस्य विरहप्राप्यामित्यर्थः पक्षेतितद्धर्मावच्छिन्नसाधनाव्यापक
त्वरक्षणार्थं तद्धर्मावच्छिन्नसाध्यव्यापकत्वरक्षणाय सपक्षैकदेशवृत्ति धर्मस्य पक्षांतरे भावाद्यावत्सपक्षवृत्तिर धर्मावच्छि
न्नसाध्यस्य च सर्वत्र सपक्षे सत्त्वात् साध्याव्यापकत्वपरिहाराय सपक्षैकदेशेति तादृशोपाधेः पक्षवृत्तित्वे साधनाव्यापकत्वमेवस्या दम
दतः पक्षावृत्तित्वलाभाय सपक्षैकदेशेति यथा गगनं परिमाणवद्द्रव्यत्वादित्यादौ गगनपृथिव्यन्यतरत्वावच्छिन्नसाध्यव्याप
के पृथिवीत्वमुपाधिरित्यर्थः ननु पक्षेतरस्यापि संदिग्धोपाधित्वे पक्षेपि व्यभिचारशंकायाः प्रतिबंधकत्वे पर्वतो वह्निमानित्य

मादित्यादि प्रसिद्धानुमाने विलयप्रसंग इत्यत आह इत्थं चेति तादृशशंकायाः प्रतिबंधकत्वे चेत्यर्थः वस्तामइति अनुकूलतर्का
नवतारदशायामप्रतिबंधकत्वमिष्टमेवेति तादृशशंकानिष्ठानादेव तदनुमानप्रवृत्तिरिति हेत्वाभाससाहेत्वेव स्यात् इत्यर्थः सर्वत्रैवानुकूलतर्क
स्यानाभिप्रायेण हेतुत्वाभिप्रायेणाशंकते पक्षेनन्वित्यत्रोपाधिरित्यादिना उपाधेरिति उपाधेः उपाधित्वेन ज्ञानस्य व्याप्यत्वलाभा
र्थं स्वनिष्ठतार्थं उपाधेः उपाधित्वरूपस्य व्याप्यत्वलाभार्थं उपाधित्वेन स्वज्ञानार्थमितिवार्थः अनुकूलतर्काभावोपजीव्यत्वेने
ति अनुकूलतर्कसत्त्वे साधने साध्यव्याप्यत्वग्रहात् साध्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वनिर्णये साध्यव्याप
कत्वघटितोपाधित्वस्यैव ज्ञानमेव न स्यादतउपाधित्वज्ञाने अनुकूलतर्काभाव उपजीव्य इत्यर्थः अनुकूलतर्काभावस्यापि क
थमुपाधिरुपजीव्यः साध्यसहचरिते हेतौ साध्याभावसामानाधिकरण्यज्ञानजनने न हि तस्य शक्तत्वं तज्जाने च साध्यसंबं
धितावच्छेदकज्ञानविषयोपाधिसामप्रतीव्य साध्याभावसंबंधिति किंतु उत्पत्साध्यसंबंधस्यावच्छेदकमेदे विनाशानां
हि सुपाधेराव्यत्वलाभार्थमनुकूलतर्काभावस्यैव तस्य फले साध्याभावसंबंधबोधे उपाधेरुपजीव्यत्वादि निगमनादिरहाउ भ
योर्द्वैवुत्वाभिनितोपाधादित्यादि मूलार्थसंहृष्यसंतुमाह उपलक्षणमिति ॥ एतत् ॥ उपाधेरुपजीव्यत्वाभिधानं ॥ उपल
क्ष्यं दर्शयति व्यभिचारिणीति उपलक्षणत्वाभिधानेवीजमाह उपजीव्येति असंभवादिति उपाधिस्वरूपस्यानुकूलतर्का

दिं
२४

भावस्वरूपस्य परस्परोपजीव्योपजीवकभावाभावादनुकूलतर्केण हेतौ साध्यव्याप्यत्वग्रहेऽपि तद्व्यापकत्वाह निसंधानदशा
यामुपाधेः साध्यव्यापकताग्रहसंभवात्साध्याभावोऽसंबंधिनि साध्यसंबंधस्याविरुद्धत्वेनावच्छेदकग्रहानपेक्षणादनुकूल
तर्काभावदशायामपि उपाधेरुपजीव्यत्वासंभवादित्यर्थः॥ व्याप्यव्यापकभावस्थलनियमस्तु उपाधेरनुकूलतर्काभावव्याप्य
त्वेऽप्यनुकूलतर्काभावस्य व्याप्यत्वेऽप्यनुकूलतर्काभावस्य सत्वेनाचयिकदाचित्संभवेन नोपाधिव्याप्यत्वं तथापि व्याप्यनुकूलत
र्कपदं सतर्कविपरीतता पाद्यव्यतिरेकपरं तर भापकस्याधिकदेशाप्रोरस्य न हि यत्र कल्पनेनेनान्यथा सिद्धत्वात्सिद्धन्नेरेत
ने व्याप्यस्य न रूपकत्वं कल्पनादीनि अस्यैव विनिगमकमित्यत आह विरोधनात्विनिरपेक्षतराज्ञानकालेऽपि अप्रतरशानोपाधि
ग्रहप्रतिबंधोऽपाधेन दीज मितिभावः अनुकूलतर्काभावस्यानमानविषयाव्यभिचारधीद्वाराहेतुकत्वमितरभिप्रायेणाहुः अ
नुकूलतर्कस्याप्रसिद्धेकारणत्वात्तदभावः कारणाभावप्रयुक्तत्वप्रसंगेनेवापादयतस्तयोजकत्वस्य अभिप्रायेणाशंकसेनेत्यानुकूलेति राम
व्यभिचारशंकाप्रतिबंधकस्य तर्कस्य प्रयोजकत्वेनतत्सकारणत्वमित्यभिप्रायेण परिहरति विनापीति तथा चानुकूलतर्कं विना व्याप्ति
नियतसहचारसंकोच प्रतिबंधकीसत्व्यभिचारधीसंपादनद्वारा उपाधेर्दूषकत्वमितिभावः ननु पर्वतो वह्निमान् धूमादित्यत्र महा
नसत्वोपाधिताविषये इतो वन्ह्यभाववान् ह्रदमहानसान्यतरत्वे सति महानसत्वाभावादित्येकेमेणानुमापयितुं शक्यते चेत्साध्य

कोऽव्यावर्तकत्वादित आह सप्रपक्षेति पक्षनिष्ठापि साध्यव्याप्तत्वोपायिकाव्यावृत्तिरित्यत इत्येतयोगित्वमित्यर्थः उपाधेर्दूषकत्वं तत्रोपपत्ते तत्र व्यो
त्रैर्नाभः ननु ह्रदो वह्निमान् धूमादित्यादौ वह्निसामग्र्यादिरुपाधिरिति व्याप्तिः तेषां व्यभिचारोन्नायकत्वादत आह सत्वा इति पक्षे तिन्नतेषां लक्ष्य
त्वमेवेति भावः तत्र सन्नतिपक्षोन्नतिपक्षोन्नयने नन्वेवं व्याप्त्यासाध्यं निवर्तते तस्य तदव्याप्तत्वस्येयस्य साधनस्येति व्यर्थमत आ
ह साधनस्येति यत्साधनीयसाध्यनिवर्तते तेन साधनेऽसो पाधिरित्येवंपरं परासंबंधलाभायेत्यर्थः केवलपदमवधारणे न तुल्य
क्षणे विवक्षितमित्यवधारणार्थः लक्षणानन्वये शेषमप्युपपादयितुं कल्पान्तरमाह यद्वेति तन्त्वेतदभावेन साधनवति साध्यं निव
र्तते इति पूर्वलक्षणार्थेन नैव नन्तत्प्रयमतमाह तथा चेति तथा च यथाभेदादिवत्तेनेतस्मिन्नर्थे परतया व्याख्यानं न कर्तव्यमिति
भावः ननु पक्षान्तर्भूत्साध्यस्य व्यावर्तनेनेति लक्षणमपक्षस्यसाध्यसाधनसंबंधव्यावर्तकत्वरूपतदर्थोपवर्णनेनोपसंहारो विरुद्ध इ
त्यत आह शुद्धस्येति तथा चोन्नयनप्रकारमात्रकथनं न तु लक्षणार्थोपवर्णनमिति न विरोधः प्रथमव्याख्यानसारेणाह पक्ष इति द्वितीय
व्याख्यानुसारेणाह क्वचिदिति साधनवतीति एकाश्रितसाधनावच्छिन्नसाध्यव्यापकोऽपाधन्नरोधेनेत्यकारस्याश्रयणीयत्वे प्रभुतु साध्य
व्यापकस्यापि तत्प्रकारः संभवतीत्याशयेनोभयसाधारण्यान्नयनप्रकारकथनमितिभावः साध्यसाधनसंबंधाभावसिद्धौ कुपं
साध्याभावसिद्धिरत आह साधनवत्त्वेनेति विशिष्टाभावस्येतत्संबंधाभावस्याप्यतिरिक्तत्वादितिभावः॥ ननु साध्यसाधनसंबं

सि०

धाभावोन्नायकत्वस्यदर्शनेप्रकृतेकर्त्तव्येषुद्धसाध्याभावोन्नायकत्वस्यदर्शनमसंगतमतस्तत्संगमयितुंशंकामवतारयतिनचेतिसाध्याभाव
सत्त्वेइतितथाचसाध्याभावस्यसाध्यसाधनसंबंधाभावव्याप्यत्वाद्व्याप्यव्याप्यस्यतुतएवव्याप्यत्वादित्यभिप्रायेणोपाध्यभावेसा
ध्याभावव्याप्यत्वंदर्शयितुंशुद्धसाध्यव्यापकत्वमितिभावः वायोः प्रत्यक्षत्वेसाध्यप्रत्यक्षस्पर्शाश्रयत्वस्यैवहेतुत्वेनप्रतिपाद
नाद्रव्यत्वेसतीतिसार्थक्यमनुपपन्नमतआह द्रव्यत्वइति द्रव्यपदंवहिरित्यपरं प्रत्यक्षपदंवावहिरिन्द्रियजन्यप्रत्यक्षपरं ननुकथमे
णोत्राप्यकतयोपाधेर्व्यर्थकत्वेपत्रसाध्यसाधनसंबंधाभावासिद्धौपक्षस्यसाधनत्वेनाव्याप्तेनेनाव्यापकत्वेनवोपाधेर्नैतत्का
रत्वसंभवत्यत्रनिरुक्तलक्षणस्यासंगतत्वादसंगतिरित्यतआह व्यापकेति प्रायशइतिनयाचप्रापिकोयंप्रकारोनसार्वत्रिकइति
भावः शुद्धसाध्याभावइति साधनीयत्वस्यघटतत्वेनाव्ययः अवच्छेदकवतीति विशेषणवत्त्वेनज्ञातेविशिष्टाभावबुद्धेर्विशेष्याभा
वावलंबितत्वादितिभावविशिष्टाभावस्यातिरिक्तत्वपक्षेप्याह अवच्छेदकवत्तितिशेषितेननि प्रायशइत्यस्यप्रायोजनमाहयतिप्र
ज्ञत्वेतिगगनंप्रत्यक्षस्पर्शाश्रयत्वात्प्रमेयत्वादित्यत्रगगनेतद्भयसंबंधाभावत्वेऽप्यद्भूतरूपाभावादिसत्त्वेपक्षेगगनेस्पर्शात्मकसाधनाभा
नवत्वेनज्ञातानाभावान्नोक्तक्रमेणशुद्धसाध्याभावसिद्धिपर्यवसाने अत्रचरूपवितिस्पर्शवतिद्भयसंबंधाभावस्यसाध्येषुद्धसा
ध्याभावोन्नायकत्वसंभवादितीयपक्षेत्वनुसरणीयंतत्रदुष्टादौव्यभिचारात्ततस्तत्वप्रमेयत्वसंबंधस्यापकत्वाभावादुद्भूतरूपस्यन

तयोन्नायकत्वमितिताहृशसाध्याभावेनिवहिर्द्रव्यत्वेनविशेषितेनगगनेवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाभावस्यवहिर्द्रव्यत्वेस
त्युद्भूतरूपाभावादितिक्रमेणवाप्रत्यक्षत्वतत्पक्षेशुद्धसाध्याभावस्यान्नायकत्वमित्यर्थः यथाश्रुतार्थेत्वागेवीजमादर्शयितुंयथा
श्रुतार्थमाह पक्षस्यसाहित्यायसाधनसंबंधीत्येतावन्मात्रेणसाधनविशिष्टसाध्याभावोन्नायकत्वोत्थानात्स्वार्थमाहयत्साधन
विशिष्टमितिवेर्थ्यमुक्तादिपरिमाणयकत्वमप्याह जलमितित्र पृथिवीत्वस्यजलेस्वत्वाभावाक्त्रायकत्वेनात्वस्यवाहृधविशि
ष्टस्यत्वाभावोन्नायकत्वेनचलक्षणसत्त्वादित्यर्थः एवमग्रेप्यत्वेतदेस्यादिदषणांतरंतत्रापिवोध्यंसाधनविशिष्टसाध्याप्रसि
द्धेरितिसाध्यसाधनतोभयेनिवर्त्ततेइत्यर्थस्तुपरापिनायदोषः विंतुद्धयोरुभयत्वेनाभावस्यसुलभत्वात् तथापिपत्रभिन्नसंबंधे
नसाध्यसाधनभावस्तत्रसद्धेतौपर्वतोवह्निमानितस्पादित्यादौहेतुतावच्छेदकसमवायेनसाध्यतावच्छेदकेनवासंयोगेनोभया
भावस्यकेवलान्वयितयात्रुन्नायकपर्वतत्वादित्यादौहेतुतादिन्नपक्षातेरेकप्रतियोगिनिपर्वतत्वाभावादावतिव्याप्तिरिति सा
ध्यपदस्यप्रकारकप्रमाविशेष्यत्वसाधनवत्वप्रकारकप्रमाविशेष्यत्वोभयं निवर्त्ततेइत्यर्थस्तदाहेतुकेनसाध्यकेचाप्रसिद्धि
रित्यादिकमूह्यंयथासंभवमसिद्धेः सम्प्रतिपक्षस्यचोन्नायकत्वस्यतानियामकमितियत्स्वनिष्कर्षमाह साधनत्वेति सा
ध्यवत्वप्रकारकसन्साधनवत्वप्रकारकोयोबोधस्तद्विरोधिनीत्वाद्दियस्यैवमतोयोभावः साध्यस्यसाधनस्यवाभावः पक्षेतदुन्नाय

दि॰ ३८

कव्यतिरेकप्रतियोगित्वमित्यर्थः पर्वतत्वाद्यवच्छेदेन वन्ह्यभावभ्रमदशायां पर्वतत्वादिरूपेण वन्हिमद्धर्मदर्शनादिविधपातात्सा
बोधाद्वैरोधित्वात्तदुन्नायकेतिव्याप्तिकारणपाभावेतियात्त्वाभावभुक्त्यादिलक्षणविरोधित्वमापर्क अन्वयधर्मिता ध्यसा
धनघटादिमत्त्वबोधस्यापिताहृशत्वान्नाद्विरोधित्वद्धिकघटाद्यभावस्योन्नायकेतिव्याप्तिस्ताहृशबोधत्वावच्छिन्नविरोधित्व
चाप्रसिद्धंतन्मात्रप्रकारकबोधविरोधित्वंच साध्यसाध्यतावच्छेदकाभावादावपित्याप्तियधर्मितावच्छेदकविशिष्टधर्मि
णियद्भाववत्त्वज्ञाने नियमतस्ताहृशसाध्यसाधनवत्त्वबोधस्तत्तिरोधः स्तदभावो विवक्षितः साध्यतावच्छेदकाद्यभावस्यस
ध्यादिहृन्मितपाद्यमाणएव ताहृशबोधविरोधीनत्वमधर्मितावच्छेदकेलेतिनातिप्रसंगः अम्नूयेति एकधर्मिकसाध्य
वत्त्वसाधनवत्त्वबोधस्यतत्रभ्रमेकरूपत्वादितिभावः भ्रमादिरूपेणियादेरेकधर्मिकत्वेनाहृशबोधेनविवक्षितं किंतु साध्यसा
धनप्रकारकबोधंप्रतिसमानधर्मितावच्छेदकत्वसामस्ताविरोधित्वंविवक्षितं तच्चवायुः स्नेहवान् गंधादिसारोजलदृष्टियोले
हृगंधप्रकारकप्रमामारायापिसुलभं अहृन्निहेतुकेतत्साध्यकेवाप्रममारोयेवप्रसिद्धिरिति एवंयाख्यानेपिसाधनस्यसाध्यमि राम
तिपयाप्रकृतार्थलागएवाहृन्निहेतुकादिस्थलेप्रमासंभवेनलक्षणासाव्याप्तिर्मलेचलसरंगमुक्तासाध्यव्यापकत्वमेवसर्वत्र हा
प्रीतंनतुक्तापिसाधनव्यावर्त्तकत्वमित्यादिरस्वरसोपिवदन्तीत्यासक्तिः॥ अस्मिन्नेवपक्षेसार्वभौमव्याख्यानेहृषपितुमस्सा

तियल्लितिपक्षेसाध्यसाधनाम्नताआवर्त्तकत्वंलक्षणवन्हौव्यंतत्रजलत्वंगधवत्त्वमेयात्प्रमेयवत्त्वागंधादित्वादौसत्प्रतिपक्षस्यासिद्धेर्वो
न्नायकेपृथिवीत्वादौलक्षणगमताप्रमेयत्वावच्छिन्नभेदघटितस्यामतरत्वस्याप्रसिद्धाऽन्यथातन्निर्वक्ति साध्यहृमितेसतो
तितत्रवाहृज्ञेरवताहृशाप्रसिद्धइतिनाव्याप्तिः॥ ताहृशाभावइकिंसाध्यतावच्छेदकसंबंधेनहेतुतावच्छेदकसंबंधेनयात्कि
न्चित्संबंधेनवाद्यधोराह पत्रभिन्नभिन्नेति पर्वतोवन्हिमान्तद्रूपादित्यादौहमवायसंबंधेनवन्ह्यभावस्योन्नायकेतद्वयव
त्वादेस्तत्थासंयोगेनरूपाभावस्योन्नायकत्वानिरेकिंचिधर्मिमात्रेऽतिव्याप्तिश्वरमेत्याहअन्यत्रापिवेति एकसंबंधेन
साध्यसाधनभावेपिवन्हिमान्धूमादित्यादौसमवायादिनासंबंधेनवन्ह्यभावस्योन्नायकेवस्योन्नायकेवह्न्यवयवत्वेअति
व्याप्तिरित्यर्थः॥ नचसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगितासाधनतावच्छेदकसंबंधावच्छिन्नसाधननिष्ठ
प्रतियोगितान्यतरवदभावोन्नायकत्वोक्तौनायंदोषइतिवाच्यं॥ जलत्वंप्रमेयवत्त्वादित्यादौस्वरूपसंबंधेनसाध्यतापांप्रमेय
त्वेनसत्वस्यापिहेतोः साध्यतयास्वरूपसंबंधेनतदभावोन्नायकेऽतिव्याप्तिरिति॥ संबंधभेदेनैवप्रतियोगितावच्छेदकभे
देनापिहृषणांतानुमाह किंचेतिसाध्यसाधनान्यतरवतीतितत्रसत्प्रतिपक्षस्यासिद्धेर्वोन्नायकेऽव्याप्तिरितिभावः महान

सिं· तीयेतिनच साध्यतावच्छेदकसाधनतावच्छेदकात्मतस्वघ्छिन्नप्रतियोगिताकाभावोनायकत्वंवाच्यं पत्राभिन्नाभिन्नेसंबं
३७ धेनसाध्यसाधनतावच्छेदकतातत्रप्रशुक्तरीसानस्वच्छिन्नताहशाभावोत्रायकेऽतिव्याप्तेः॥ प्रमेयपक्षके प्रमेयत्वहेनकेवात
३८ इत्वात्त्वरूपस्यामनरत्वस्याप्रसिद्धेरन्यथाताल्लिर्वह्निपक्षाहनित्वेसतीति लाघवाराह पक्षसाधनवंतावितिपक्षतावच्छेद
कस्पसाधनस्पवाश्रमाविरोधेघूहदेवह्निव्यावर्त्तकेअतिव्याप्तिवारणायप्रमेनिताहशाभावस महालेवनात्मिकाभृग
ग्राहिकयोपारेमातेनपर्वतोवह्निमान् धूमादित्यादौपर्वतधूमवंतोजलहृदस्थेतिसमूहालंबनात्मकप्रमाविरोध्येहृदेवह्निव्या
वर्तकेवहिसामग्र्यादौनातिव्याप्तिः पक्षतावच्छेदकादेरपिविषयत्वाततहिशिष्यत्वेनेनिर्दोषपक्षसाधनवंतौ तत्रताहशप्रमाविरो
ध्येअहन्निहेतुकेवल्यमाणाव्याप्तिदूषणस्यलक्षणनिर्णायस्वसंभवान्नसांहत्यपितुमाह तत्रेति तत्रताहशलक्षणेदूषक
तावीजंलक्ष्यतानियामकमितिशेषः अफलमिति सत्प्रतिपक्षोन्नयनेसाधनवतः व्यभिचारोन्नयनेचपक्षस्यानुपयोगि
त्वेनोपादानंनिष्फलंस्यादितिभावः आहन्निहेतुकइति जलेवह्निमत्त्वाकाशादित्यादावेत्यर्थः अव्याप्तिरिति साधनवतो राम
प्रसिध्यातिदुक्तलक्षणासंभवादितिभावः॥ पक्षतावच्छेदकमनुपादायापिपक्षस्यतत्र धर्मिकत्वेनोपादानेऽव्रतिपक्षतावच्छे
दकस्थलेव्यभिचारोन्नायकेऽव्याप्तिर्नसंभवतीतिधनुपादायापिपक्षस्यतत्रधर्मिकत्वेनोपादानेऽव्रतिपक्षतावच्छेदकस्थले

सानोकाअव्रह्निहेतुकेसत्प्रतिपक्षोन्नायकेऽव्याप्तिमइत्तेप्रकारांतरमपनयनस्यतिपक्षतिपक्षतावच्छेदकसाध्येत्यतीतित्र्यत्रापिप्रतीतिविशेषोविशिष्यो
पादेयतेनेनसमूहालंबनादायदोषः यथापिसाधनतावच्छेदकस्यानुपादानेद्रव्यंविशिष्टसत्वादित्यत्रसत्ताश्रयेरव्यत्वाभावोन्नापवेतिव्याप्तिःत
दुपादानेचतत्समारायातिव्याप्तिवारणायप्रमात्वोपादानमत्वंतत्यापिताहशप्रतीतिविशिष्टस्यतद्धर्मिकत्वेनोपादानेकर्तव्येप्रमात्वनननि
विशतेइत्याशयेनप्रमात्वेनोपात्ते तत्राप्यनिदर्शनबाधक्यार्थेपि अभिमताभिस्पेतेनात्वितंतेनेत्यादितीयात्रिके ताहशधर्माश्रयत्वेनेनसंब
ध्यते संयोगेनेति समवायेनहेतौजलत्वस्यसमवायेनाश्रयेवह्निव्यावर्त्तकत्वेनत्वस्यासंभवादितिभावः पक्षतावच्छेदकस्येति तथा
चतदाश्रयेसाध्याव्यावर्त्तकत्वेनलक्षणगमनमितिभावः संयोगेनसाधनवतः प्रसिद्धावपितत्रसाध्यव्यावर्त्तकत्वाभावान्नलक्षणा
गमनेपिस्यादृसंयोगेनधूमवतश्चेतिसमवायित्वादाविति पक्षतावच्छेदकताघटकसमवायेनमेयत्वस्याहत्तेःपक्षतावच्छेदकघटत्वा
श्रयेचतातिमत्वस्यसाध्यस्यसत्वनियमादिति अत्रेवकल्पे अतिव्याप्तिभयात्वान्हिमत्सर्वतेति निर्वह्निपर्वतपक्षकेसत्प्रतिपक्षोन्ना
यकत्वेनसत्यास्यत्वाहह्निमदितिधमावयइति तस्यपक्षतावच्छेदकताघटकसमवायेनसाधनाश्रयत्वादितिभावः अतएवऽक्तेति
व्याप्तिरेवउपाधिपत्वाव्यत्वादिरुपापाघस्यनाप्रतिच्छिन्नतोव्याचष्टे आद्यायघस्वेत्यादिनावह्नीतिनचधस्याव्यापकेपक्षेतरेवह्निव्यापकत्वस्या
पाघत्वेनाप्राप्तिसिद्धिरितिवाच्यंव्यातिरेकिमित्वस्यतद्व्याप्यत्वेनापादकत्वादिति ननुभवदुक्तेयव्यभिचारित्वेनेत्यादिकमपिनानुमितिप्रतिबं
धकतावच्छेदकमितितत्स्यरव्यानयोःसतत्राह अस्मदुक्तमिति तदुन्नयनस्वरूपयोग्यता मितिफलोपधानरूपतदुन्नायकत्वस्य
व्याप्तिपक्षधर्मतारूपत्वात्समवादितिभावः तथा॥ति साध्यव्यभिचारव्याप्तौ सर्थःव्यभिचारस्येवतद्व्याप्यवत्ताज्ञानस्यापिव्याप्ति

३८

धीविशेषितत्वादितिभावः पर्यवसितेत्यादिकं चेति उपाधिशरीरस्यानैव्यभिचारादिविषयकत्वसहितस्तु तायां साध्यव्यभिचारित्वेन साधनाविशेषणादित्र
यातु व्यभिचारव्याप्यतावच्छेदकसाध्यव्यापकाभावसमानाधिकरणत्वे सत्त्वावच्छिन्नघटितत्वान्तद्धापित्रतिवंधकतावच्छेदकमेवेतिभावः व्याहत्वो
पाधिक नतु दूषकं पक्षेतरत्वस्य शुद्धसाध्यव्यापकत्वाभावान्नातिव्याप्तिः संभवतीति तदुपपादयति यथोक्तेत्यादिना यथोक्तेन
शुद्धसाध्यव्यापकत्वघटितेन वह्निनाधूमस्येति पर्वतो धूमवान् वन्हेरित्यत्र धूमवत्पर्वतस्य पक्षतायां पक्षेतरत्वस्य नितु कथं धर्मावच्छि
न्नसाध्यव्यापकत्वादिरूपपर्यवसितसाध्यव्यापकत्वाद्युपाधित्वलक्षणानाक्रांतं तथा सिद्धांतिनं देवतत्त्वस्यत्वादितिभावः तद्दूषयति परिकिंचेद्धर्मा
वच्छिन्नसाध्यव्यापकत्वघटितेनोपाधित्वलक्षणाज्ञानादेतस्यैव व्यवहारोपाधिकमिदं नतद्दूषकमिति ग्रथात्रनाह व्यवहारोपाधिकत्वेचेति ननु
मयापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमिव तद्धर्मो वा च्यइत्यत आह पर्यवसितेत्यादीति मतान्तरमाह
व्यवहारोपाधिकमित्यादिना व्यवहारोपाधिकं उपाधिव्यवहारोपाधिकं तत्त्वस्य तावच्छेदकं तेन सत्प्रतिपक्षोन्नायकेसाधनव्यापकेव्यभि
णलक्षणाव्याप्तिर्न दोषायेतिभावः न तत्साध्येति धर्मस्य समानाधिकरणविसर्जि व्यव्यापकत्वासित्यादिका मिसर्थः नन्वेवमननु
गतमित्यत आह साध्यसाधनेति तत्क्षणस्याप्यननुगतत्वादितिभावः नन्वेवं वह्निमान् धूमादित्यादौ धूमाव्यापके वह्निसमाना
धिकरणे महानसत्वादावतिप्रसंग इत्यत आह वक्ष्यतइति वक्ष्यमाणसाधनतदव्यभिचारित्वेन नत्रैवेशयेनोपाधिशरीरस्यानैवव्यभिचा
रानुमानेनफलत्वस्यादितिभावः वक्ष्यतइति च नातिप्रसंगः वह्निमान् धूमादित्यादौ न च स्वपरोत्यादिरूपवत् द्रव्यत्वादित्यादौ पृथिवीत्वा
भावः संभाव्यएवेतिभावः इदं गुरुत्वरूपादित्यत्र पृथिवीत्वाभावोनसंभाव्यएवेतिभावः पृथिवीत्वाभावादौरिति तस्यापि गुरुत्वस

एन
२८

समानाधिकरणस्वरूपाव्यापकत्वादिति शुद्धव्यभिचारीति तादृशे तेतु स्वरूपमनुक्ते तत्पाप्यत्वात्पृथिवीत्वाभावव्याप्यत्वात्तद्व्याप्येति
पृथिवीत्वाभावव्याप्यस्यार्थः तथा च वक्ष्यतेयद्व्यभिचारियत्साधनं तच्च तत्पव्यापकत्वेन स्मरणं यत्ननु व्यभिचारितावच्छेदकसाधनतावच्छेदका
वच्छिन्नाव्यापकत्वपेनातिव्याप्तिः स्यादितिभावः दूषणोपाधिकोविति दूषणाव्यभिचारोन्नायना इति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे तद्धर्मावच्छिन्नसाधना
व्यापकत्वव्यभिचारोन्नायनोपपदिकं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सतीति पक्षाद्वृत्तित्वं च स्यान्नातिपक्षेस्यत्यादिकमित्यर्थः साध्यतावच्छेदकगर्भ
त्वेपीत्यमाह तत्त्वादितिसकलगुणव्यक्तिषिति यदिकस्याचिद्गुणव्यक्तौ द्रव्यत्वं निरुपाधिः स्यात्तदागुणत्वेन निरुपाधिव्यवहारे सेवव्यक्तिर्विषय
इत्युक्तेपि परीहारसंभवे साध्यतावच्छेदकगर्भतानोपादेयेतन्त्वेतत्संभवेनीतिभावः निरुपाधित्वादिति तथा च साध्यतावच्छेदकाप्रवेशेन तद्गुण
समानाधिकरणस्य द्रव्यत्वाव्यापकस्य गुणत्वावच्छिन्नसाध्यकेप्युपाधिव्यवहारः स्यादितिभावः साधनतावच्छेदकगर्भतायांवीतमाह गुणत्वेन गु
णइत्यादिना गुणकर्मान्यत्वेतिसाधनतावच्छेदकाप्रवेशे गुणत्वावच्छिन्नसमानाधिकरणद्रव्यत्वस्य सत्वाव्यापकस्य विशिष्टसत्त्वात्वावच्छिन्न
हेतुतायामप्युपाधिव्यवहारः स्यादितिभावः उक्तातिप्रसंगवारणाय साध्यतावच्छेदकादिगर्भमुपाधित्ववक्तु तथैवलक्षणेदुष्टांपितुंजि
ज्ञासामाह तथाचेत्यादिनाननुगतमिति तद्रूपावच्छिन्नसाध्यसाधनकपावद्रुपाध्यनगतमित्यर्थः न तु साधनतावच्छेदकानधावनप्र
तरमेव तद्घटितगर्भतापानत्वेपेण गुरुत्वेसाध्येपृथिवीत्वाभावादावतिव्याप्तिः न ता गुणत्वेन गुणेसाध्ये सत्तायां सोपाधित्वेपि गुणकर्मान्य
त्वविशिष्टसत्त्वास्येन सोपाधितापत्तिरित्यादिदोषोधत आह नत्विति अत्र ननु गमादिति व्यभिचारिसाधनव्यक्तीनामेकव्यक्तिव्यापकस्यापि
व्यक्त्यंतरव्यापकस्याप्यंतरव्यापकस्यापि तद्घटकस्यव्यापकस्योपाधित्वेन तद्घटितलक्षणस्य तत्साधनकपावद्रुपा

४०

धिसाधारणत्वाभावादिति भावः रूपत्वावच्छिन्ना व्यापस्येति तन्न्याचरूपत्वावच्छिन्नेति रूपाव्यापकत्वमेवेति प्रकृते तथा सति शैत्ये रूपाभावादि
तिननु साध्यव्यभिचारिपत्तासाधननावच्छेदकावच्छिन्न तदव्यापकत्वस्यैक्योनाननु गमइस्सत आह व्यभिचारित्वेनेति उपदर्शनमितिउपाधिश
रीरभानस्यसाधननिष्ठसाध्यव्यभिचारादिविषयकत्वसहितस्तुतायामित्यादिना नन्वेवमेवेतिकृत्वा यन्न तत्सुपन्यस्तं तत्रापि साधनाव्यापक
त्वस्योपाधित्वशरीरप्रविष्टत्वात् तःसाधनव्यापकस्योपाधित्वस्वीकारात्केचिदित्यादिना तन्मनात पार्थक्येन मतोपन्यासोऽनुचित इत्यत
आह उपाधिलक्षणमित्यादिना दूषकतायांस त्प्रतिपक्षो व्यापकतायां आनुकूल्याभावमुक्त्वा प्रातिकूल्यमप्याह अव्याप्तीतिकारकाप्यक
ठिनसंयोगवत्त्वादिसत्त्वानुमानाश्रीशीत स्पर्शवत्वादौसाधनव्यापकेः व्याप्तिकरत्वादिसर्थः अभिप्रायप्रकाशपतीतितथाचान्येवलिति
कृत्वापन्यतमन्यस्तं तस्यैवापायप्रकाशनं केचित्तित्यादिनाहकृतत्तनमनांतरमेवेतिभावः धूमवान्वह्नेरित्यादौसाध्यस्याप्ययोगो
लकाद्यन्नित्यादिनोपाधित्वाद्याहसाध्यताव्वेच्छेदकेति साध्यतावच्छेदकरूपेणापि साध्यव्यापकत्वादिनोपाधित्वस्य सत्वात्तत्प्रति क्षेपोऽप्रसं
गत इत्यत आह परंप्रतीतिसाध्याविशिष्टस्यदूषकतावीजं दर्शयति पक्षइत्यादिना प्रकृते चस्यापनोहेतुरेवपक्षस्तत्र साध्यव्यभिचारस्य
साधनस्यानिर्णये तु मानं वैय्यर्थ्यादनिर्णयेचपक्षधर्मतापाच्चानिर्णयात्तस्यानुमानस्यायोगादिसर्थः न तदुक्तं वक्तनसाध्यतावच्छे
दकावच्छिन्नसाध्योभ्यवत्ननु यत्रानुकूलतर्काक्लिनोहेतौ नसाध्यव्यभिचारसंदेह स्तत्रैवानुमानं भविष्यतीत्यतो दूषणास्त्वयन्ना
हेहेत्वाविलादिनासंदिग्धोपाधिना साध्यव्यापकत्वादिलक्षणोपाधित्वसंदेहेन कशांतस्येति साध्यस्यस्वव्यापकतापाः निर्णयात्साधना
व्यापकतासंदेहेनेवसंदिग्धोपाधित्वस्यप्रसक्तत्वाश्चिभिभावः न तस्योपाधित्वसंदेहः किंनिश्चयात्साध्यव्यभिचारसंदेहाधायकत्वात राम
२३

२

तत्र्याह व्याप्यसंशयस्येति साधनाव्यापकत्वसंदेहे साध्यव्यापकोपाधिव्यभिचारस्यसाध्यव्यभिचारव्याप्यस्यसाध्यव्यापकत्वसंदेहेचसाध्ये
साधनाव्यापकव्याप्यत्वस्यसाधनाव्यापकत्वव्याप्यस्यसंदेहस्तव्यापकसंशयायायकं इतिभावः ननंतेनवितासंशयानपयात्तिरेवेत्यत्राननु त
आह कोटिस्मरणादितइतिएवकारेणाव्याप्यसंशयव्युदासः तदुपपन्नेः व्यापकसंशयोपपन्नेः ननुसंशयसामान्यस्यव्याप्यसंशयंविनास
भवेपिसंशयाविशेषेनदन्वयाद्यनविधानादेतुत्वभाविष्यतीत्यतआह्वक्कचिदितितदनुविधानस्यव्याप्यसंशयानुविधानस्यतत्स्मरणएवव्या
पकनश्चावयोःस्मरणएवनतसंशयइतिभावः ननुपनतत्साहचर्य्यंनगृहीतंतत्रैवतदनुविधानाकारणत्वंभविष्यतीसतआहतदग्रहइति
ताद्धशसाहचर्याग्रहइत्यर्थःस्मरतामितितथाचव्याप्यसंशयस्यकोटिस्मारकतयानोपयोगइतिभावः धर्मिज्ञानादितयकारणंतरेणान्य
थासिद्धिनिरासितुमाहपर्वतादिकमिति आदिनाधूमसंशयस्याभावेनवह्निसंशयस्याभावस्तयोर्दर्शनादिसर्थः अतएव व्याप्यसंशयस्यका
रणत्वादेनव्याप्यांशिउक्तदकोटिकात्तशयाद्यापकांशेप्युक्तदकोटिकःसंशयइत्यर्थः उक्तदलेवात्राप्यहेतिज्ञीतिर्विषयताविशेषवि
तिभातःकारणात्कर्षणोवेत्येवकारेणाकारणात्कर्षस्यव्यवच्छेदः नन्वेवंस्तत्रव्याप्यसंशयस्यहेतुत्वादर्शनान्ताहिरोधइत्यतआह
समानेसादिसूत्रेत्विति उपलक्षणापरं व्याप्यसंशयोपलक्षकत्वेनतात्पर्यमाह कंचकारस्यनिरर्थकत्वापत्तानस्यैवतदर्थकत्वसं
भवेपदांतरेत्वक्षणाःस्यात्स्याशयेनाहतत्रस्थचकारेवेति समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च
विशेषापेक्षोविमर्शःसंशयइतिसूत्रं अस्यार्थः समानोयोनेकेषांतत्कोटितदभावकोटिमतोधर्मस्तदुपपत्तेः धर्मिणि
तद्वत्वज्ञानाद्विप्रतिपत्तेर्विरुद्धकोटिद्वयप्रतिपादकाच्छब्दान्नित्योनवेत्यादिवाक्यादुपलब्ध्येरनुपलब्धेस्तत्कोटिसाध्याच

४१ पक्षतत्कोटेरुपलब्धिर्विपक्षवतुपलब्धिर्वोपलब्धिकार्येकारणोपचारात् तयोरव्यवस्थातश्चाभावनिश्चयस्तस्मात्पक्षविपक्षव्यावृत्तधर्मवत्ता
नादितियावत् विशिष्य तद्व्यावर्त्तितविशेषदर्शनाभिप्रायेणपक्षासविशेषोविशेषादर्शनंतत्सापेक्षंतुसनेनकारणानुत्कालत्वग्रहणमाह विम
र्श इति एकधर्मिकं किन्तु द्वोभयपार्श्वीविमर्श इत्यर्थः अत्रचयद्यदोनित्येनवेतिसंशयस्यपक्षसाधारणादिधर्मदर्शनतः प्रत्येकसंभवात्सरा म
शानुमितेरिवाव्यवहितोत्तरत्वंकार्यतावच्छेदकीकृत्यहेतुतामाह साधारणाधर्मस्यधर्मितावच्छेदकत्वेनसंशयविषयत्वसंभवेपि
असाधारणत्वस्यसत्पक्षत्वसाध्यतदभावाविरुद्धयगर्भितयाविप्रतिपत्तेश्च तथात्वासंभवादिदिनाभावः प्राक्रान्तमेवसूत्रमुपाद
पितंमतान्तरेणमाह कोटिद्वयेत्यादिना तत्कोटिसहचरितधर्मवत्ताज्ञानंतदभावकोटिसहचरितधर्मवत्ताज्ञानंचेत्यर्थः धर्मस्यैकत्वा
मिति कोटिद्वयसहचरितोपस्थकोधर्मस्तद्वत्ताज्ञानत्वेननहेतुत्वमित्यर्थः इदमुपलक्षणं कोटिद्वयाधिकरणैकसंबंधेनधर्मस्यवृत्ति
त्वमपि नापेक्ष्यत इत्यपि बोध्यं एतावता लिंगसंदेहस्यकपतन्त्रानभावस्तर्ह्येयति अवगाहतेचेति लिंगिकेति लिंगिकंचतदभावश्च
तयोः सहचरितो साध्यसहचरितंलिंगंसाध्याभावसहचरितलिंगाभावमित्यर्थः साधारणधर्मएव तज्ज्ञानएव अस्यव्याप्यसंश
यस्य अत्र वह्निसहचरितधूमवान्वन्ह्यभावसहचरितधूमाभाववान्वेत्याकारकसंशयाभावेपि धूमवान्नवेत्याकारकसंशयादनु
भवसिद्धस्यवह्निसंशयस्यानुपपत्तिः अनुहन्तत्वव्याहतत्वसंबंधेनावन्हितदभावसहचरितधूमत्वज्ञानात्संयोगेनवह्निसहचरि
तधूमत्वावगाहिनः समवायेनवन्ह्यभावसहचरितइच्छत्ववत्त्वावगाहिनोज्ञानादपिसंशयापत्तिश्चास्वरसोनव्यारसतेनघस्थितः
मिलितयोरिति अत्रमिलनं नापेक्षाबुद्धिविशेषविषयत्वरूपं तदुभयत्वं तत्पर्याप्तिसंयोगसंबंधावच्छिन्नप्रतियोगिताकस्यलिंग राम
२४

तदभावोभयत्वावच्छिन्नाभावस्यकेवलान्वयिनः कोटिद्वयसहचरिततयाऽन्यप्रतियोगितावच्छेदकसंयोगसंबंधेनालिंगतदभावोभयवत्ताज्ञान
स्यासंभवात् असाधारणस्थलेपक्षसंबंधावच्छिन्नाभावस्यकोटिद्वयसाहचर्यं तेनसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितः
धर्मिवृत्तित्वज्ञानस्यैवसंशयहेतुत्वात् अन्यथा समवायसंबंधावच्छिन्नधूमाभावस्यवह्नितदभावसाहचर्येणहेसंयोगेनधूमवत्ता
ज्ञानेनापिसंशयापत्तेः नाप्येकविशिष्टापरत्वेधूमधूमाभावयोर्विनुद्धत्वज्ञानेनैकविशिष्टापरत्वेनतज्ज्ञानासंभवात् तस्माद्धूमस्य
संयोगेनतदभावस्यचविशेषणतयैवधार्मिणिसंशयविषयत्वेऽपेक्षाबुद्धिविषयत्वरूपोभयत्वावच्छिन्नत्वमेवहेतादृशसंयोगावि
शेषणान्यतरसंबंधेनतदुभयत्वावच्छिन्नप्रतियोगिताकत्वेनाभावस्यकोटिद्वयसाहचर्यमहास्वानिकयन्तिसंशयोपपत्ति
रित्याशयः टीकाकारेतिटीकाकृता सत्प्रतिपक्षस्थलेविनुद्धोर्हेत्वोः प्रत्येकमेककोटिसाधारणेपिमिलितयोरसाधारणाविषया
संशयजनकत्वस्वीकारात् लिंगसंदेहस्थले तथात्वस्यानुक्तत्वान्नानुपपत्तिरिति अत्रापिवह्नितदभावसहचरितव्यतिरेकेप्रतियो
गितावच्छेदकोभयत्वकधूमतदभाववान्नयमित्याकारकज्ञानाभावेपिधूमवान्नवेतिसंशयादनुभवसिद्धस्यवह्निसंशयस्यानुप
पत्तिरन्यतरसंबंधेनाभाववत्ताज्ञानासंभवान्द्रमनमताद्दशज्ञानेनापिनोपपत्तिरित्यस्वरसः द्वित्यचेतिव्याप्यसंशयस्यस्वातंत्र्येण
साधारणधर्मादिज्ञानविषयोवासंशयहेतुत्वेनेत्यर्थः स्फुटएवेति उपाधौ साधनसमानाधिकरणाभावप्रतियोगित्वसंदेहेसाध
नेप्युपाध्यभाववदृत्तित्वसंदेहस्योचित्यादर्जितत्वात् तस्यचसाध्यव्यभिचारव्याप्यतयाहेतौ साध्याभाववद्वृत्तित्वस्यचसाध्यव्य
भिचाररूपतया स्फुटत्वादित्यर्थः साधनाव्यापकेति साधनाव्यापकव्याप्यत्वस्यसाधनाव्यापकत्वव्याप्यत्वात् साधनेसा

४२

व्याप्यभाववत्त्वनिश्चयस्य तत्साध्ये साधनवद्वृत्त्यभावप्रतियोगित्वस्यापि व्यभिचारत्वात् व्यभिचारसंशयाधायकत्वोपपत्तेरिति भावः। मतान्तरमाह उ
पाधिरित्यादिना वदन्तीत्यन्तेन यथा दण्डवति न सुरूपस्य निश्चयेऽपि तद्धेतुरक्तत्वसंदेहात् तु ब्रह्मे रक्तदण्डवान्न वेति संशयस्तथोपाधिव्यभिचा
रित्वेन निर्णीते साधने तदुपाधौ साध्यव्यापकत्वसंदेहात् साधनं साध्यव्यापकोपाधिव्यभिचारि न वेति संशयस्तथा च इत्यं न वेति साध्यव्या
पकत्वस्यानिर्णयात् प्रथमप्रकारस्य साधनाव्यापकत्वस्यानिर्णयात् द्वितीयप्रकारस्य च तत्रासंभवादिति भावः। अत्र साध्यव्यापकव्य
भिचारित्वेन तद्व्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वं साध्यव्यापकस्य प्रमेयत्वादेः सर्वत्र संभावितत्वेन तद्गमावगमासंभवात्
तथा चार्द्रेन्धनत्वेन धूमव्यापकतावच्छेदकत्वसंदेहे तद्व्यभिचारित्वेन निर्णीते वह्नौ कथं धूमव्यापकतावच्छेदकार्द्रेन्धनत्वावच्छिन्नाभा
ववद्वृत्तित्वस्य संदेहस्तादृश्यगवेषणोपस्थितेः साधारणादिधर्मदर्शनस्य चाभावात्। किंच यद्यार्द्रेन्धनं धूमव्यापकं तदा वह्निर्धू
मव्यापकव्यभिचारी भविष्यति यदि न तद्व्यापकं तदा नेति क्रमेण संशयाधायकत्वं न संभवति संशयकोटितावच्छेदकधूमव्यापकता
वच्छेदकार्द्रेन्धनत्वानुल्लेखेन तादृशकोटिप्रसिद्धेः वस्त्वार्द्रेन्धनत्वानुल्लेखे धूमव्यापकार्द्रेन्धनत्वावच्छिन्नव्यभिचारी न वेति संशयस्य
धूमव्यापकार्द्रेन्धनाद्व्यभिचारस्य वह्नौ निर्णये नासंभवादार्द्रेन्धनत्वमनुल्लिख्य धूमव्यापकतावच्छेदकयत्किंचिद्रूपावच्छिन्नाभाव
वद्वृत्तित्वस्य च संशये आर्द्रेन्धनत्वे धूमव्यापकतावच्छेदकत्वसंदेहो प्रयोजक इत्यस्वरसो वदन्तीत्यनेन सूचितः। अर्थान्तरस्य
पुनरुक्तदोषत्वादुक्तदोषमाह एकाशब्दीत्यादिना यदि पुनरेकरूपेण साध्यतायामनुमयस्य समहीत्वं न रूपान्तरेणेति तत्रैकांश
परस्येतिरूपान्तरवाशेशाकपाजकत्वस्य शाकपाजत्वाशेषरूपान्तरवत्तस्पर्यः यदि चोत्र यत्रसमिकविशिष्टाघारत्वमयेव्याबुद्धिर्विबो राम

२५

५

ब्विषयत्वं वा साध्यतावच्छेदकं तत्राह एकविशिष्टेत्यादिना फलितं तुल्ययोगक्षेमयोरिति सहचारदर्शनव्यभिचारादर्शनरूपव्याप्तिग्राहकसत्त्वेन
तुल्ययोगक्षेमयोः साध्यसाधनयोः साध्योपाध्योश्चेत्यर्थः। क्षित्यादिकं सकर्तृकं कार्यत्वादित्यस्य सदनुमानत्वात् क्वेयं तत्रोपाधिः संभवतीत्यत आ
ह वस्तुतरिति तत्त्वाग्नेहेति सद्धेतुत्वाग्नेहेत्वर्थः उपाधित्वसंदेहेन उपाधित्वघटकसंदेहेनेत्यर्थः तथा च साध्यव्यापकत्वसंदेहस्य व्यभिचारसं
शयोपधायकत्वेऽदाहरणादर्शनमिदं न तु वास्तविकोपाधिप्रदर्शनपरमिति भावः। दृष्टान्तासिद्धिमाशंकते न चानैकान्तिकत्वेति तज्ज्ञानं
तत्संदेहज्ञानेन दर्शितत्संदेहज्ञानार्थं न दुष्टत्वेनैकान्तिकत्वसंदेहोभाववत्त्वमित्यभिप्रायेण तदुष्टत्वस्य संप्रदायिकत्वादित्यग्निमेया
न्वयः व्याप्त्यज्ञानस्यादावनेविमर्थमतन्त्राह प्राचामिति अत्र तान रूपासिद्धेरपि नेयांहेत्वाभासत्वेनासाधकतानुमाने लिंगतया तज्ज्ञाना
नार्थं न दुष्टत्वं नापि स्यार्थः नवीनमते पित दुष्टत्वं वनीपयोगं दर्शयति जिज्ञासा शीति अनैकान्तिकत्वसंदेहोभावेन तनही ज्ञाप्तिज्ञासापासोधा
रणाधर्मत्वादिज्ञानस्य तद्वीजस्यानुसरणोत्स्यापि साधारणाधर्मवत्त्वादिज्ञानेनैवोपस्थितौ संशयस्यापरिहारादिति भावः। तज्ज्ञाना
दीत्यादिना को घृ उपस्थितसाक्षिपरिग्रहः तद्दुष्टत्वानस्यानैकान्तिकत्वसंदेहो भावनस्य इसंदिग्धोपाधेरपि निश्चयदशायां सत्प्रतिपक्षीत्वा
यकत्वस्य सत्त्वाद्दूषकत्वापत्तेरिदमसंगतमतन्त्राह उपाधित्वस्येति सत्प्रतिपक्षोत्थापनेनोपाधित्वस्य संशये न दूषकतावीजमिति भावः
साध्यव्यापकत्वसंदेहे साधनाव्यापकत्वनिर्णीयस्यत्वेतव्यतिरेकस्य पक्षेन संदिग्धत्वमतः परयाति कश्चिद्व्याप्यत्वेनेति साध्यव्यापक
त्वसंदेहस्थलेपक्षे इत्यस्य व्याख्याकश्चिच्चेति कश्चित् साधनाव्यापकत्वसंदेहस्थले पक्षधर्मत्वेनेति॥ तत एव बाधाबतारोदबाधक
त्वमुपाधिनेतित्यत्र चित्र्यापत्तेरिति भावः व्यतिरेके साधारण्यादिति हेतुं दूषयति नचेति पक्षस्यैव सपक्षत्वादिति हेतो अत्र तथा सत्त्वा

४३

भावादितिभावः अनन्वयीति तु बाधेनोपाधित्वं न दूषकत्वं पक्षेतरत्वं न खण्डितमिति यथा च वह्निमान् धूमादित्यत्र नोपाधिस्तथात्रापि अन्यत्र हेतुमाह साध्यव्या
पकतापादिति न चान्वयपक्षे साध्यसंदेहात् व्यापकत्वनिश्चय इति भावः अनुकूलतर्कादिनेत्यादिना स्वतः सिद्धव्यभिचारस्य हेत्संभवः न तद्धेतुसाध्य
व्यापकता न हेतुना साधारण्यं सतिकरं असाधारणस्य हि साध्यसहचारधीप्रतिबंधेनान्वयव्याप्तिधीप्रतिबंधो व्यतिरेकव्याप्त्या हेतौ च साध्यनस्भा
वयोरपि तद्विशेषात्सत्यमिति पक्षेतरदूषकतावीजं न तु अन्वयमपि अत्र न संभवतीत्याह व्यतिरेकिण्येत्यादिना अन्वयव्याप्त्यग्रहस्याकिंचित्करत्वा
दित्यपि मेयत्वान्वयः पक्षेतरे अपि पक्षेतरत्वेतिलाभः हेतुत्वाभावान्निपक्षे अन्वयन संभवादाह पक्षेतरेहेति यौ न तु तस्य परीहारायव्या चष्टे व्याप्तिवि
रहेति व्याप्तिज्ञानाभावद्वारकतामिति व्याप्यत्वासिद्धेरनभीवेत्याभिमतस्य यथाश्रुतार्थानुरोधेनेदमुक्तं सोपाधित्वज्ञानस्य प्रतिबंधकतापरः
वेपासिरोः क्षिप्रापातविषयत्वेन त्यन्यस्येत्यादिना तत्र दूषणतानमसंगतमतत्तद्भिप्रायेणोपव्याचष्टे औपाधिकत्वेति तथा च नञर्थस्यौ
पाधिकत्वज्ञानेन समन्वयइतिभावः तत्प्रतिबंधकत्वरूपस्या विघटकत्वस्यासंभवादाहकारणाभावरूपेति तादृशज्ञानं पाधिकत्वज्ञानेन
उपर्यस्योपाधिकत्वज्ञानेन समन्वयं स्वपंसमर्थं मतांतरमाह अनोपाधिकत्वज्ञानस्येति विनाकारणीभूतेति साक्षादविरोधिनो ज्ञानस्य
जनकज्ञानविघटनद्वारैव प्रतिबंधकत्वादिति कल्पनीगमितिकारणत्वमिति पूर्वेणान्वितं सैव सोपाधित्वज्ञानस्य प्रतिबंधकतेनेव दूषणा
तिनत्वन्यस्य साध्यव्यापकत्वेस्या दूषणान्वयइत्यर्थः यथाश्रुतमेवेति प्रतिबंधकत्वरूपस्य यथाश्रुतविघटकत्वस्यैव रसनादिति
भानः एतच्चाव्याने दूषणान्वेवं नः प्रतिबंधकत्वमित्यत्रत्वन हत्यस्य संगतिरिसस्वरसोपि बंदनिषायां सूचितः व्याख्यानहयरु
वोपाधेर्व्याप्तिविरहरूपत्वाभावात्तत्र व्याप्यत्वासिद्धमध्येतभीवइत्यतो व्याप्यत्वासिद्धेत्यादिप्रतीकस्यार्थमाह व्याप्यत्वासिद्ध इति व्या एम

२८

प्यत्वज्ञाने उपाधेरंतर्भावासंभवादाह अंतर्भावइति साध्यव्यापके साधनाव्यापकत्वं साधने वा साध्यव्यापकाव्याप्यत्वमित्यनयोर्विशेषणविशेष्यभा
वमात्रभेदेपि तुल्यत्वादेकस्वरूपेणैवानयोर्व्याप्तिविघटकत्वादनुगतं रूपं कंन मनुचितमतत्तद्वकावीजमाह भिन्नधर्मिकत्वामेति न त्वन्यस्येत्यादिना भि
न्नधर्मिकत्वमेवात तिवंधकत्वेबीजमुक्तेन देवपरिहृत्य पुनः शंकेतिभावः कारणाविघटकत्वाभावेनाप्रतिबंधकत्वशंकनमनुचितं सा सा
क्षात्प्रतिबंधकत्वस्यापि संभवादतत्तदसंभवमाह विरोधिविषयत्वेतितदभाववत्ताव्याप्याविषयकत्वेनेत्यर्थः अन्यत्रैवेति साध्यव्याप्यव्यभिचारित्वेनेत्य
कत्र वृत्तीत्यकारणेव व्यभिचारस्याहतः साध्यव्याप्यव्यभिचारीप स्येति व्युत्पत्त्या साध्यव्याप्याव्यापकत्वेनेत्यर्थः द्वकारणीपः साध्यव्यभिचारित्वमित
ज्ञनदकरोप्रकृतासतिः साध्यव्यापकत्वादिघटितोपाधित्वस्याज्ञाने तेन साध्यव्यभिचारीयस्येति बहुव्रीहिणा साध्याव्यापकत्वमर्थः करणी
यइतिभावः तस्मादिति मत्वेनस्य ज्ञानस्य दूषकताबीजस्याभावादित्यर्थः नतेनाज्ञदूषकत्वस्यापि संभवाद्धेत्वान्तरमिति निष्कर्षणामनुचित
मतः परत्वादि तस्मादित्यादेरिति न तु साध्यव्यापकत्वादिनिश्चयस्यैवोपाधेर्दूषकत्वे संदिग्धोपाधेर्दूषकत्वप्रसंगइत्यत इत्याह निश्चयदशाि
ति नन्वेवं संदेहदशायां दूषकताबीजस्याकथनान्यूनत्वमत आह यन्निश्चयद्वारेति तत्संशयस्यउपाधित्वसंशयस्य यद्वेत्यादिव्यभिचारोन्न
यो न हरूपमाणकस्याहेमानत्वाद् इति चाक्षुषादिरूपतान्निश्चयस्य च साध्योपाधिव्यभिचारनिरूपकाधिकरणसाक्षिकर्षाधीनतया तत्त्वात्ति
कर्षत्वेपुगपदेवोक्षयानिर्णापादुपाधिनिर्णयस्योपयोजकत्वे न संभवतीति भावः यद्यप्युपनीतभानात्मके चाक्षुषादिरूपतान्निश्च
येप्युपाधिनिश्चयस्य काचिदुपयोगः संभवत्येव तथापि परपीभिप्रायेणोद तथा चोपाध्युपन्यासे परस्य कन्धिन्मान संकचिताज्ञानुम
निकं व्यभिचारज्ञानमिति भावः अत्र हेत्वादिगंधे व्यभिचारानुमानात्त्व्याप्तिविरहानुमानेस्य पर्यगमावैरणीयतिति साध्यासंबंधि

४४ त्यादिना ननु हृदेस त्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्तान्तरे साध्यत्वंवच्छिन्नावच्छेदकस्य सत्त्वान्तादृशव्याप्तिविरहानुमानं बाधितमित्यत
आह साधनतावच्छेदक इति तथा च साधनतावच्छेदकमेव पक्षीकृत्योपाधिव्यभिचारित्वादिना साध्ये बाधितावच्छेदकत्वमनुमे
यमिति भावः अव्यभिचरितसामानाधिकरण्यकारणीभूतसत्तानाविषयतावच्छेदकमिति मतमनुसृत्य तत्साध्यवदन्ये सादिनास्य व
स्यानुगतस्येति अननुगते तत्संभवेतु साधनान्तरे तत्त्वासिद्ध्याप्रकृतसाधने तदनुमानं संभवतीति भावः क तायत्वादिति वा हि समा
नाधिकरणसंताभावप्रतियोगिध्वंसकत्वम् हेत्व मेवद्विसमानाधिकरणसंताभावप्रतियोगित्वस्यापि विषयीकृतत्वेन व्यभिचारधी
मुद्रयात स्वेव विरोधित्वसंभवइत्सत्वेव्याप्तिविरहानुमानेनेति भाक नन्वेवं व्यापकसामानाधिकरण्यरूपव्याप्ताबुपाधिज्ञानमकिंचित्क
रमत स्तत्प्रतिबंधकत्वाभिप्रायेणाह साध्यव्यापकोपाधीत्यादिना साधनाव्यापकोपाधीति तथा च व्याप्तिविरहोन्नायकतयेति
पक्षधर्मत्वं वह्नितत्समानाधिकरणाभावप्रतियोगितावच्छेदकं वन्हिव्यापकार्द्रेंधनादिव्याप्यतावच्छेदकत्वादित्यनुमानेनेत्यपि
तिभावः वह्निमानमेयत्वादित्यादिके वलान्वयिसाधनेव्यभिचाराद्यनुमाने साधनाभावस्याप्रसिद्ध्यात्वद्वृत्तित्वस्योपाधित्वासंभवा
दाहव्यतिरेकिणीति अव्यवहितप्रक्रांतव्यभिचारानुमानस्यास्योपाधित्वमिति शंकानिरूपकरणाया ह व्याप्तिविरहस्येति अत स
वाहत्रिगगनादाविति दूषणाव्यस्पति ननुवाद्रिर्धूमव्यभिचारी आर्द्रेंधनव्यभिचारित्वादित्यत्र वन्ह्यभाववद्वृत्तित्वस्य राम
गस्यानोपाधिः तस्य साध्याव्यापकत्वात्साध्यव्यापकत्वघटितोपाधित्वज्ञानादेतु मितिप्रतिबंधकस्यादिस्यापितधस २०

व्यभिचारनिरूपकापेगोत्वकवृत्तिधर्मप्रवक्षम व्यभिचारित्वेवन्ह्यभाववद्वृत्तित्वस्य सत्त्वेन साध्यव्यापकतायाप्रवाग्रहादत आह व्यभिचारस्फुटेति
ति अयोगोलकवृत्तिधर्मोत रेण व्यभिचारस्फरणेवन्हावभितुल्यसामग्रीकतया व्यभिचारस्फूर्तिः स्यात्तदानीचोपाध्यनुसरणमकलत्वस्या
दितिभावः तथा च धूमाभाववद्वृत्तित्वरूपदलादानेन च वन्ह्यभाववद्वृत्तित्वमपिवर्तत इति तस्य व्यापकत्वमिति सर्वथः अस्य साधनाभावव
द्वृत्तित्वस्योपाधेः ननु नोपाधिमात्रोच्छेदोऽस्य चोपाधित्वादित्यत आह तिनयीतिने साधनाभाववद्वृत्तित्वेन तथा विधेति साधनाभाववद्वृ
त्तित्वोपाधिनापत्र साधने व्यभिचारोनुमेयस्तत्साधनाभावद्वृत्तित्वोपाधेस्तत्र संभवादार्द्रेंधनव्यभिचारित्वे धूमव्यभिचारित्वव्यभिचारेन्ह्यभाव
वद्वृत्तित्वव्यभिचारित्वादिति व्यभिचारानुमाने आर्द्रेंधनव्यभिचारित्वाभाववद्वृत्तित्वस्योपाधेः संभवादिसर्थः ननु नोपाधिमात्रोच्छेदः केवला
न्वयिसाधनीयोपाधेरेवसंभवात व्यतिरेकिसाधने पितथाविधोपाधेरप्रतिसंधाने अस्य ऽपधित्वसंभवात् अत आह वस्तुत इतिव्याप्य
व्यापकभावव्याघातेति व्यापकव्यभिचारिणोपि व्यभिचारित्वव्यापकव्यभिचारनिरूपकाधिकरणव्याप्यसत्वप्रवसंभवात्तत्र व्यापकाभा
नवतिव्याप्यसत्त्वेकुतो व्याप्यव्यापकभाव इति भावः हेतोः व्यभिचारानुमानेहेतोरार्द्रेंधनादिव्यभिचारित्वस्य साध्यव्याप्यत्वेन धूमादिव्यभिचारित्वरूपसाध्यव्याप्य
तिनसाध्याव्यापकत्वादित्यस्य साध्यव्याप्यहेतुव्यापकत्वमेसादिः व्यभिचारसाधनेऽवृत्तिगगनादौ व्यभिचाररूपसाध्यत्वेनासत्त्वेन कथं तत्र साध्याव्यापकत्वमत आ
ह व्याप्यत्वाभावेति तन्नापि साध्याः व्यापकत्वपरिहरति साधनाव्याप्यत्वस्य वेति मत्वे संयोगादाविति रूपसत्त्वे संयोगादित्यत्र स्यपौडपाधित्वत्तत्व्यभिचारानुमाने
संयोगोत्पव्यभिचारीस्पर्शव्यभिचारित्वादेसेवंरूपसंयोगाभाववद्वृत्तित्वस्पर्शव्यभिचारित्वरूपसाधनव्यापकत्वान्नोपाधिरित्यर्थः न दूषणमस्युद्धरति
प्रतियोगिव्यधिकरणेति संयोगाभाववद्वृत्तित्वस्य सत्त्वेपि प्रतियोगिव्यधिकरणसंयोगाभाववद्वृत्तित्वस्यासत्त्वात्साधनाव्यापकत्वमसत्त्वादिति भावः प्रतियो
गित्वस्यैकस्याभावात्संयोगानधिकरणवृत्तिसंयोगाभाववद्वृत्तित्वं कालितेन तत्र च संयोगाभावात्यस्वेवे पर्य्यासत्त्वाच्चाह साधनवदन्येति तथा
त्वासंभवात् साधनव्यापकत्वासंभवात पर्य्यव्यभिचारेन्यापकत्वेन नत्संशयाधायकत्वेन चोपाधेर्दूषकत्वं व्यवस्थापितं तद्दूषयति एवं चेति संदि

ोपाधिरिति निष्कृते। पाधिना व्यभिचारितायद्दंसदिग्धोपाधिना व्यभिचारसंशयोपि व्याप्यन्देहे तो दृक्तल्पवत्त्व त्वाभावेन स तनिय हाविच्छेद्यपितिभावः न कर्त्तव्यस्य संदिग्धोपाधिकत्वं
व्यस्य समानः सवलनं ते न संदिग्धोपाधिना तथा च मानिहेतुसवलनानि व्यभिचारसंशयास्केदितस्येवोपाधिसंशयाधीन व्यभिचारसंशयास्केदितस्योपाधित्वस्त्रतिपक्षोन्नायकत्वस्या
४८ त्वलेनतन संदिग्धोपाध्युपन्यासस्य क्षस्य एतत्वाभावादितिभावः सत्प्रतिपक्षे व्यभिचारसंदेहस्यानावश्यकत्वेहखक तात्स्यकथनत आह प रस्परेति न चात्र सात्र रत्नुमिति प्रतिबंध
ने वतस्य रूपत्वामितिमावः। तत्र सत्प्रतिपक्षकस्थितुपाधिस देहवशात्तत्रापि व्यभिचारसंदेहोपवत्तेवत्तत आह अवश्यमिति उपाधिसंदेहात्कथं सत्प्रतिपक्षविद्धेदात्तत्राह दुष्टार्थी
तिष्ठ नयोः स्वतंत्रया व्याप्तिनिश्चये एतस्मिन्नेन व्यभिचारसंदेहस्य साधारण्यात्मना प्रतिबंधकत्वे पि विशिष्य व्यभिचारसंदेहो वश्यं प्रतिबंधकस्त्वाद विशिष्येति विशिष्य तद्धेतुनावच्छेदकं धर्मिता
वच्छेदकीकृत्य सत्प्रतिपक्षः प्रतिहेतुधीनानुमितिप्रतिबंधः एकत्र व्याप्तादिभिन्नद्वारा सत्प्रतिपक्षस्य दूषकत्वमिति मतनिरसनुसस्याह व्यभिचारणं कोनित्यः स तः उपाधिसंदेहे वेनास्सा
धारणादिपर्मज्ञानेन व्यभिचारादी सादिना व्याप्तिपक्षधर्मतापरिग्रहः तथा च प्रसंगात् सत्प्रतिपक्षस्य व्यभिचारधीकाधनस्यवा प्रसंगादिसर्थः न च वमुपाधेर्व्यभिचारज्ञानजनन त
द्वारैव दूषकत्वेन स्वरूपतो सत्प्रतिपक्षोन्नायकता प्रयोजकत्वात्सादिसर्वोत तो न्नुमितिप्रतिबंधो न स्यान्‌ एवमसाधारणविपर्ययादितो वश्य मा ताभासत्वानुपपत्तिः सत्प्रति
पक्षोन्नयनएवतराभासत्वसंभवात् तदाशयेनस्वपति अन्नेत्सादिना तुल्यवलत्वे समानव्याप्तिपक्षधर्मतावकासामर्थ्ये नस्मात्हेत्वतिरेकप्रतियोगित्वे नवीदिसादिव्या
न प्रतिबंध्यपरामर्शाप्रामाण्यप्रसंजकत्वादीसाम्यूपाननकीदीसादिनाविशेषपरिनानादिपरि ग्रहः अधिकबलत्वे प्रतिबंध्यपरामर्शाप्रामाण्यापत्तानकालीनाप्रामाण्यग्रा
हव्याप्तीतिव्याप्त्यादीसादिनापूर्वसत्तापरिग्रहः ननु त्रयनपक्षस्य सत्प्रतिपक्षनाधाप्तनेतरोन्नयनस्य सत्प्रतिपक्षोत्रयस्त्वव्यतिरेकेसाध्याभावनिरूपितव्याप्त्यादिवोधजननेन अतः ननु
पनात्‌ परत्वेति दूष्यं च व्यभिचारोन्नायकत्वस्साद्वैविकतेलिमलेत न्माओपदर्शीतमुपलस्तापरमितिभावः। वस्तुतस्तूपाधित्वस्ताग्रविवसाधनाव्यापकत्वस्य हलसव्यभिचा
भासत्वमतन्नाह। इत्यमितिदित्व साधारणाविपर्ययस्याभासत्वाभिधानेनत्नादितराभासत्वेनसंभवतीति शीकने पदीपादीसादिना अन्यथा विशिष्टप्रतिबंधोः साधारणस्यदूषक
ताबीजनात्संभवतीत्याह व्यतिरेकित्वातिसत्प्रतिपक्षोन्नायकतयादूषकत्वेन संभवतीत्याह सत्प्रतिपक्षे सत्प्रतिपक्षोन्नायकस्येतिहस्त्वव्यतिरेकितोपाधेः सत्प्रतिपक्षोन्नायक
त्वेन्नसाधारणपव्यतिरेकस्यासाधारणपसाध्यव्यापकतान्नाहकप्रमाणाभाव्यस्याभासत्वेः न च हिनसाध्यव्यापकस्यापिग्रा कपाकत्वतोदोभासत्वस्यादतः सत्प्रतिपक्षोन्ना
यकतो पपाधिकेतितरप्रतिपक्षः साध्याभाववान्‌ पक्षः १८

पक्षात्‌ हेत्विति सत्प्रतिपक्षमेवमवच्छिन्नसाध्यव्यापकत्वं तदुन्नयनोपयिकं यद्यपि पक्षदत्तावस्थुपाधेस्तदास्ति तथापि तस्याप्याभासतया एतदंतर्भावएवेति भावः उपा
ध्याभासानामेको व्याभासतोप्रयोजकं स्वयमाह तद्यामिति यत्रसपक्षकयत्साधकयत्साधने दोष ॥ व्यभिचारः सत्प्रतिपक्षोवा ॥ सामान्यतोभिहित
मुदाहरणविशेषे दर्शयति एवं चेत्सादिना सामानाधिकरण्येन तन्मात्रेणउदेश्याप्रकृताप्रकृतानुमितिविरोधितया भासत्वमिति दर्शय
ति तद्यतिरेकेणेत्यादि पक्षेकदेशे तादृशापाध्यभाववति एकदेशांतरेति तादृशोपाध्यभावशून्येतया साध्यसिद्धिहेतुत्वा तादृशास्य प
क्षाव्यापकाविपर्ययस्य एकदेशाद्वृत्ति मति पक्षयापीति पक्षैकदेशमात्रविषयकतदभावव्याप्यवत्तानिर्णयस्येत्यर्थः तादृशसिद्धिति प
क्षतावच्छेदकावच्छेदेनेति हिसर्थः अप्रसिद्धसाध्यविपर्ययस्याभासत्वं मूले उक्तं तत्राप्रसिद्धिपदस्यासदर्थकत्वमज्ञानार्थकत्वे हषाणां
दर्शयति विपर्ययस्येत्यादिना साध्यविपर्ययस्यासत्वे साध्यस्वव्यतिरेकाप्रतियोगित्वमनुपाधित्वेप्रयोजकमितिभावः साध्यस्वव्यतिरेकाप्रतियो
गित्वनिश्चितसाध्यव्यतिरेकसिद्धिसंभवादितिभावः पूर्वसाधनव्यतिरेकत्वेनाभासत्वेनत्रामितिवक्तुं विशेषतिषेधवलात्सक्तशेषाभ्यनु
ज्ञामपितिषेधयति पूर्वेत्यादिना क्रमेणाहृ परमाहृ वह्निनेति उपाधित्वनियमेऽयेधमवान्‌ वह्नेरिसत्रनायं धूमवानेंधनाभावादिसत्रव
स्य भावस्योपाधित्वप्रसंगात्‌ अनयाविलनियमेधूमाभाववानेंधनाभावादिसस्यमतिहेतो धूमवान्‌ वह्नेरिसत्रांइधनाभावाभावात्मक
पूर्वसाधनव्यतिरेकस्येंधनस्यानुपाधित्वप्रसंगादिसर्थः उपाधितापाद इति प्रसंगादिसग्निमेणान्वयः सत्प्रतिपक्षमात्रमिति व्यतिरेकित्ता

४५ धूमेहेतावविनिशेषः तत्संभवात् पूर्वसाधनव्यतिरेकस्योपाधित्वसंभवात् ननु धूमवान् वह्नेरित्यत्रस्थापनायां न धूमवानार्द्रेन्धनाभावादित्यत्र प्रतिस्था
पनायां पूर्वसाधनवन्ह्यभावो नोपाधिरयोगोलके धूमाभाववति वन्ह्यभावस्यासत्त्वेन साध्याव्यापकत्वात् तत्राह आभासत्वेपीति उक्तक्रमे
ण साध्याव्यापकत्वग्रहे स्थापनाहेतौ व्यभिचारग्रहे एवस्यात् धूमाभाववति वन्ह्यभावाभावस्य वन्हेर्ग्रहे उक्तादपि विशेषाग्रहदशायामेव स
प्रतिपक्षोपन्यासात् तदानीं साध्याव्यापकत्वाग्रहादित्यर्थः वस्तुतः वस्तुगत्या तदानीं स्थापनाहेतौ व्यभिचाराग्रहकाले तत्त्वेन साध्याव्या
पकत्वेन यद्यपि धूमाभाववति वह्निरित्याकारकं यत्र ज्ञानं जातं तत्र वन्ह्यभावाभावस्याकारकं च जातं तत्र स्थापनाहेतौ व्यभिचाराग्रहात्साध्य
व्यापकत्वग्रहाभावश्च सत्वाग्निपक्षत्वमक्षतमेव तथापि विचारकस्य धूमाभाववति वन्ह्यभावाभाव इति ज्ञानकालेवह्निलिङ्गेनापि ज्ञानसंभ
वात्र दशाभिन्नविचारकस्य सत्प्रतिपक्षोच्छेदो बोध्यः उपन्याससंभवादिति पूर्वसाधनव्यतिरेकस्यानुवर्तेते अत एव सत्प्रतिपक्षमात्रोच्छेदा
पत्तिर्भूभयावलंबनेति प्रतिस्थापनाहेत्वाभासग्राहकानुकूलकोटिद्वलवत्त्वेरंत्यर्थः बलवत्त्वेरसादिनोक्ष्याव्यत्वे इत्येतेन कथकसमयस्यैवा
कारः इति कथकसमये तादृशाकारककथकसमयेत्यर्थः वस्तुतो देवेति तत्त्वाभासत्वादिस्ववकारार्थः अस्यार्थः पूर्वसाधनव्यतिरेकः ननु शिलादि
केसकर्तृकेकार्यत्वादित्यत्रस्थापनायां मनित्यत्वस्य प्रागभावर्वत्त्वे ऽकार्यत्वाव्याप्यत्वेन नित्यत्वे पूर्वसाधनव्याप्यव्यतिरेकोनभवति एवं शिला
दिकं न सकर्तृकं शरीराजन्यत्वादित्यत्र शिलादिशिलादिव्यामात्यतरत्वावच्छेदेन साध्यव्यापकेनित्यत्वसदुपाधिरेवति कथमाभासत्वमित्यत आह राम॰

कादाचित्कत्वे नेतित यथा शिलादिकं सकर्तृकं कादाचित्कत्वादित्यत्रानित्यत्वे कादाचित्कत्वव्याप्यत्वव्यतिरेकस्यानित्यत्वमितिन पूर्वदोषः शिलादिक
मकर्तृकं मजन्यत्वादिति प्रतिहेतौ शिलादिव्यामात्यतरत्वावच्छिन्नसाध्यव्यापकानित्यत्वे यथा तथा तदव्यक्तिन्ना जन्यत्वरूपसाधनव्यापसाधनव्याप
कतामुपैति तत् सदुपाधित्वमितिन द्वितीयोपि दोष इति॥ ॥ पात्रशिलादर्शा अम्बुराप्रतिपात्रपात्रैः सहसमदर्शादर्शापवित्रेहोराकलशो
निधापयलिप्ताप्रागेवेशोएकत्रमासादयेत्तेषामभावेद्वादशादर्शापवित्रेते वस्तुतः एतत्तोपाएकत्रसादयतता दर्भशिरोवेघेतषहिंमुषिस्तरा
तिदेववर्हिवर्हिरित्यादि नोमहावेदिंवहलामुपचितत्वरणप्रागारम्यप्रसारापवीस्तरणोकुर्वन्नयं मपमेस्तरणातिसमेत्रत्रपातू सकदेवमं
त्रप्रयोगास्तरणतोर्यनिक्षयादाभिनस्त्रय उत्तरेतामध्येसममः दृष्याकाले प्राचेस्तरणतोगच्छेपूर्वी पुरस्ताद्दैवंतामसंवेस्तरणतोभ्यवक्त्रामेधुवा ततोर्धस्तनम
तेमयच्छति अतः प्रालेगत्वायदिध्मावर्हिः संभरणप्रागाहवनीयप्रणयनावकृतेचेत् स्हकरोतिसुत्वेप्रभृतिचनकृतेरहस्यारवाच्छेदनेच प्राक्वा
णीसेमर्षानेकत्वा अग्नीनज्वलयित्वापरीस्तीर्यसर्वेषांचतगर्तोवाग्नीनांज्वलनवरिस्तरणो परिस्तीर्यशालामुखीयमग्रेणास्तरणानिसंस्तीर्यन्यग्रेणा
तेरणावाग्शालामुखीयस्यवापुरस्तागार्हपत्यस्यवाकरोति स्तरणानिसंस्तीर्यपात्राणिसादयतिस्त्रुमाग्नेहोत्रहवणीजुहूर्ह्ययेउपभृद्यस्त
वेचस्रुवंचस्वधितिचध्रुवांप्राशित्रहरणीमिडापात्रमाज्यस्थालींवेदंवेदाग्रंचसादयित्वाग्रोषधपात्राणायत्रसादयेत आज्यंविलाप्यापोत्त
अपप्रतिमस्कानपाणिसेमत्यपतेलरणमुववपप्रब्लादप्रवाग्निनिकटेउपविमाति एष्याः स्तीत्वोपशालामुखीएककार्यानुकूलत्वमकृते

२

(४७)

स्फकार्यानुकूलज्ञानेविषयितयानच्छेदकत्वंव्याप्तेः पक्षधर्मतायाश्चविरुद्धं अनुकूलत्वंप्रयोजकत्वंतच्चकारणतावच्छेदकसाधारणंनिरूपयितुमि
तिपक्षतायाश्चनिरूपरोपक्षत्वविशिष्टपक्षधर्मत्वस्यनिरूपणादितियादृशेतिअत्रनिर्णीयत्वेपूर्वसाध्यप्रकारकत्वेपक्षसाध्यवैशिष्ट्यावा
गाहित्वेचासतिसाध्यपक्षनिष्ठासंताभावप्रतियोगित्वाविषयकत्वेनतुसाध्याभावप्रकारकत्वगर्भकेवलाव्यपिसप्रसिद्धसाद्दृष्टांतरोपनिव
संस्पृष्टेसाध्याभावनिर्णीयस्यपक्षतात्वाभावादाहसंप्रायइतिनचसाध्याभावकोटिकसंशयपक्षविवक्षितत्वेसाध्यपक्षवृत्तित्वकोटिक
संशयसंग्रहः पक्षवृत्तित्वकोटिकसंशयास्यविवक्षितत्वेसाध्याभावकोटिसंशयासंग्रहइतिवाच्यंपक्षिष्टनित्वकोटिकसंशयसंग्र
हः पक्षवृत्तित्वकोटिकेसंशयासंग्रहइतिवाच्यंपक्षसाध्यसंबंधावगाहित्वानस्यैवग्रहणेतेसंशयपराथेत्वलात्वद्धिमानितिसिद्धेश्चनि
र्वर्णातेस्लेनैववारणादितितेनेति केवलानयित्वज्ञानदशायांपक्षविशेष्यकसंशयासंभवात्साध्यविशेष्यकपक्षवृत्तित्वकोटिकसं
शयस्तत्पत्तिभावः यादृशासंबंधेत्यस्यफलमाह नवेतिसंयोगेनवह्निमिर्णीयसमवायेनतत्संशयत्वानसंयोगेनतत्सिद्धेनप
क्षत्वमितिभावः तमसमध्यतिष्ठिति॥संदिग्धसाध्यधर्माधर्मोत्रिपयाकृतत्वसंगोहपरामिदं आकाशस्यसमवायेनधर्मत्वाभा
वात्तमः प्रभृतिष्वनसमवायेनधर्मित्वमितिमतएवपक्षसमवेतत्वेआकाशसाध्यसंदिह्यतेइतिपक्षत्वतेतदापितितारइतिभा
वः संयोगादिनासंबंधेनाकाशस्यापिधर्मत्वात्स्वरूपसंबंधेनतमः प्रभृतेरपिधर्मित्वात्तत्समवायेनेतितद्वैकयिपक्षतावैकल्पनादी। रा.म.

सादेलेक्षणोत्तरपरत्वेसंशयपोषयतायामूलेऽनुक्तत्वान्नूनतापत्तिरतआहसंशयोयोग्यतामितितिनिरस्यतीतियेपक्षताबेनेतिशेषः साधकमानस्यानुमा
नहस्यसत्वात्तदभावासंभवात्तेह्यक्तिसंभवात्वाथ्येमितिहसाधकेतिसिद्धिबाधाविति। नयावप्रत्यपायोनविवक्षितमितिभावः केवलाचपिनिसाध्याभावाप्र
सिद्धातनिर्णयप्रत्ययबाधाप्रसिद्धेवाहकेवलाचपिनीति तत्रापिस्वानेनतस्याभिस्मरणादिनासिद्धाधपिषानाशस्थलेपिपरामर्शोत्तरमिति पूर्वपरामर्श
स्यअनुमित्सोत्सारकानुमितिष्टसाधनताज्ञानादेवनाशादितिभावः परामर्शोनराशीकोरप्युपपत्तिमाहस्वरसेसिवह्निव्याप्यधूमवान्पर्वत
यमनुमितिरिष्टसाधनमितिज्ञानादनुमितित्सोत्सर्थः नवेदानीमनुमित्सापत्तिः अनुमित्साकपक्षताभावात्सिद्धातिमतेपिपूर्वसिद्धिसंभवात्द
छासामग्न्याकलवत्वाद्धितदभावोपपत्तेरितिफलवलादितियत्रचतादृशाकमेयानुमित्सानुत्तारस्तत्रफलाभावोपिकल्पनीयइतिभावः स्वनिरू
पितस्वमनुमत्यतस्याः इष्टत्वेच्छायाः तदानीसिद्धिकालेतज्जनकत्वेअनुमितिजनकत्वंतथावानुमितिजनकत्वविशिष्टाइच्छातत्तदेसर्थः
तद्धितस्याः इष्टत्वेच्छायाः तदानीसिद्धिकालेपितदिच्छायाः स्वरूपयोग्यतासत्वादिलर्थः तदुपाधानेअनुमित्सुपधानेअनुमितेरिति। तथावकुत्रापिअ
नुमितिर्नस्यात् अनुमित्सुपहितत्वविशिष्टायाइच्छायाअनुमितिप्राक्कालेऽभावात्कारणतावच्छेदकावलीढपूर्ववर्तित्वस्याकार्यासादकत्वमतेतुसि
द्धौसत्यामनुमितिमसंगः तच्चस्यइतिभावः तत्सामग्रीसमवधाने अनुमितिसामग्रीसमवधाने अनुमितिजनकत्वेनत्यर्थः कारणमात्रस्येति॥
मात्रपदैकत्वार्थकंतथाचपक्षतामात्रस्यैवकारणत्वेस्यादिसिकारणपरिशेषापत्तिरितिभावः ननुपरामर्शत्वादितान्वयाघटुविधानात्तेनेनते

३

८८

नन्वेपरामर्शघहेतुत्वमप्यप्रामाण्यज्ञानेऽस्य तत्राह शेषेति अनुमितिसामग्रीसमवहितानिच्छापक्षेतेनतत्रानुमितिसामग्रीनिरुक्तस्पृहाभावस्यैव पक्षादिसर्थे
नन्वनुमितिसामग्रीविशिष्टाऽसिषाधयिषाभावजनकत्वेऽत्तु अनुमितिसामग्र्याः तत्रस्पृहयेरन् अनुमित्साविनेति सिद्धिकालीनानुमितिसामग्र्यभावादिवचना
नुमितिन तत्राह। तदानीमितितद्दानीं सिद्धिकालीनपरामर्शादिरूपकारणस्य नित्यसिद्धावपि पक्षताया अभावसत्त्वे अनुमितिसामग्र्यभावोऽयदभावा त्तस
एव हेतुत्वात्। किन्तु तत्पक्षतापेक्षयैव तत्कल्पत्वेनेति न चकारणीभूतसिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपमन्वयव्यतिरेकिताभ्यां दिनिभावः परामर्शरूप
कारणत्वे सिद्धिरूपविरोधिसत्त्वे च घटनुमित्साऽस्याननदाह तस्याः उत्तेजकत्वे साधारण्येन नचैन तत्स भवति येऽग्य विभुविशेषगुणानां स्वस्य युगपद्व
स्थानस्यासम्भवादिसमानकालत्वादृशेष्टलघुसारति यत्रोत्पन्ना। सा ध्वनिनाशस्यमाननेच्छानन्तरं ताहृशस्मरणोत्तादृशेच्छायाः स्वविषयसिद्धुप
ह्रितत्त्वेन नोत्तेजकत्वस्यात्। इत उक्तं अनुमित्सेति। अनुमित्सानन्तरं वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति स्मरणायत्र तस्य यः अनुमितिनिष्ठसाधनं
वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति स्मरणानन्तरं पक्षानुमित्सानन्तरापि तत्प्रयोजनमाह। अनुमितितिस्मरणापूर्वमनुमितीष्टसाध
नताधीननाधीसत्वेच्छासामग्र्यावलवत्वात् स्मरणमेवतस्याहेतो अनुमितिष्टसाधनताविषयकत्वपर्यन्तानुधावनेन तादृशस्मरणोत्तर
साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् अनुमित्सापूर्वकालेविनष्टपूर्वस्यस्यविशेषणतात्पर्यस्यानानुमित्सोत्तरपरामर्शे उप + स्मरणात्
कसिद्धिपरामर्शस्यानिसहकृता तत्प्रयोजनमुक्तामस्थात्मकीसिद्धिपरामर्शस्य घटनदाह अनुमित्सापूर्वेति न्योगितमतउत्पन्नेति वि रा०म०

शेषणेतिपरामर्शसिद्धिविशेषणोऽस्यार्थः लौकिकत्वसंपादनायाह अनुमित्सकालोत्पन्नेति अनुमित्सापूर्वकालेन्द्रियसंनिकर्षोत्पादेनप्रत्यक्षसा
मग्रीमत्तिवेधात् अनुमित्सोत्पन्ने चन स्यादतो निर्विवादस्यैवाभिप्रायेण उक्तं अनुमित्साकालोत्पन्नेति तदनेतरं वानुमितिरिति साध्यतद्व्याप्यविशिष्टपक्ष
स्मरणात्मिकादिमपर्यन्तत्रिक एवोक्तेति सिद्धिमात्रगोचरेच्छायाः सिषाधयिषात्वे पर्वते वह्निप्रत्यक्षं जायतां पर्वते किंचिदनुमितिर्वा जायतामिसाधा
कारकेच्छासत्त्वे सिद्धिसत्त्वे पक्षताप्रसंगः स्यात् अत आह सिषाधयिषात्वेति न तु साध्यमिति साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छि
न्नपक्षविषयत्वप्रकारिकेत्यर्थः तेन तेजोविशिष्टपर्वतानुमितिर्जायतां वह्निविशिष्टपाषाणमयानुमितिर्जायतामित्येवमाकारकेच्छायामसुलभः
न्नसाध्यविशिष्टतत्पक्षे सत्त्वे शिक्तवैज्ञानिकेन न नभ्यमानुमितेपक्षताक्षतिः तत्पक्षविषयत्वे सतस्यप्रयोजनमाह यत्किंचिदिति। ज्ञान
मिति। एतदुत्तरकालीनज्ञानमित्यर्थः यत्किंचिज्ञोवरज्ञानस्यनियमतः सिद्धत्वयातेनरूपेणेच्छायाऽसंभवात् नवयत। नवयत्किंचिज्ञोवरज्ञा
नस्यसिद्धत्वेपि न तत्सिद्धताग्रहस्याप्यामुक्तेच्छासंभवेऽतिव्याप्त्यालादिस्थले स्वरूपसत्त्वसिद्धेस्तस्यैवमतिवेधकत्वकल्पनादिति अनुमितित्वप्रका
रकत्वविहायअनुमितिविषयत्वानुधावने बीजमाह अनुमितित्वप्रकारिकायामपीतिमस्पष्टाघृतिरिक्तेति आदिनाशाब्दोपमित्योः परिग्रहः प्रत्यक्षा
धनतरमितिःप्रत्यक्षसत्त्वेशाब्दादिसामग्र्यभावकालेप्रत्यक्षभिन्नपर्वतेवह्निज्ञानंजायतामितीच्छासत्त्वेऽनुमित्सात्वादेवशाब्दादिस्थलेऽपि तत्रानुमित्त
शाब्दसामग्र्यामसामग्र्यप्रत्यक्षभिन्नपर्वतवह्निज्ञानं जायतामितीच्छातत्रानुमित्सापत्तिस्तत्र तादृशेच्छाया अनुमित्साविषयत्वात् यद्यदानीं पक्षतासत्त्वेपि

४८ अनुमितित्वप्रकारकतादेशेच्छाविरहविशिष्टसमानविषयशाब्दसामग्र्याः पृथक् प्रतिबंधकत्वात्ववतरा नौनानुमितिरिति ननु यत्र पर्वते वह्निप्रत्यक्षं तत्र
व्याप्यपरामर्शश्चसमूहालंबनात्मविषयांतरेचानुमितिसामग्र्यभावः तत्र यत् किंचिदिच्छावरानुमितिर्जायतां इतीच्छासत्त्वेपि पर्वते वह्न्यनुमितिरनुभवसिद्धा
तत्र च तत्साध्यविशिष्टतत्पक्षविशिष्टतत्पक्षविषयत्वप्रकारकानुमित्साविरहविशिष्टसिद्धिसत्त्वात् पक्षताभंगः एवमुक्तसमूहालंबने कालेशाब्दा
दिसामग्र्यभावः तत्र प्रत्यक्षभिन्नं ज्ञानं जायतामितीच्छायामप्यनुमितिर्भवतीत तत्र पक्षताभंगः एवं अनुमितित्वप्रकारकत्वानिवेशेन पत्र वह्नि
विशिष्टपर्वतविषयकप्रत्यक्षत्वरूपेणानुमितेरेव इच्छा जाता तत्र पक्षतापत्तिरतोनुमितित्वप्रकारत्वं यद्यपि तत्स्यात् प्रपकत्वे कथं प्रत्यक्षादिभि
न्ने पर्वते वह्नित्वानेनायतोपि इतीच्छासाधारणप इत्यत आह यादृशेति तथा च तत्साध्यविशिष्टतत्पक्षविषयत्वप्रकारकानुमितित्वप्रका
रेच्छायाः अन्यादृशप्याप्नतिप्रसक्तापो अतुगतरूपेणैव निवेशः अनन्यवधूमेनेत्यादिवह्न्यतिरूपन्यपाइच्छा सामान्येनैव तत्तद्व्यक्तिविनानि
वेशेभिन्नलिंगकेच्छात्मकेनैव शादेव तत्र पक्षताविरहतत्प्रतिबंधकत्वके स्पन्ते विशेषणानरहानेवानुपप्रयोजनं स्यादिति। यत्र किंचि
देतावरानुमितिर्जायतामितीच्छाघाकारिकायाश्चत्तद्व्यक्तित्वेनैव निवेशः विषयांतर अनुमितिसामग्रीसत्त्वे तादृशेच्छाया उत्तेजकत्वमावादिति।
लौकिकप्रत्यक्षसामग्रीविरहकालेसिद्धिसत्त्व पर्वतेवह्निप्रत्यक्षंजायतामितीच्छासत्त्वेप्यनुमितिदर्शनात्तत्र सिद्धिसत्त्वे चानिच्छासत्त्वप्रयुक्तपक्ष
तावारणायोक्तेसिद्धोसत्तेमितिनिसिद्धोसत्तादृशेच्छासत्वेनुमित्सभावत्तदिच्छानपक्षताप्रयोजिकेति भावः। अननुगमेपीतीन्ननुमितित्वप्र
कारकप्रत्यक्षाद्भिन्नवत्तानत्वप्रकारिकाणामिच्छानामननुगमेपीत्यर्थः॥ अग्रस्तामयीति। सिद्धोसत्त्वा आवश्यकप्रतिबंधकतका तथात स्याएव

विलक्षणरूपेण प्रतिबंधकत्वं स्यात् नतादृशेच्छायाः इति शंकास्पानरतिभावः॥ अपिनासिद्धिसत्त्वेतादृशेच्छानःसर्वचैवनेनुमितिरितिसूचितं अन्यमात्रलिंगकेति पराम्र्य
मान्यमात्रलिंगकेत्यर्थः मात्रपदस्तु भयलिंगकेच्छायाअनुकूलत्वेनतद्वारणाय॥ यदि वेति तथा च तस्याः पृथक् प्रतिवधकत्वेनास्तीति भावः उत्तेजकत्वं तु सर्वथैवनत
स्यादसभिमायेणाह॥ तदिति तल्लिंगकेति तल्लिंगकानुमितित्वप्रकारिकेच्छेत्यर्थः अन्यथा तल्लिंगकानुमिता विवतद्भ्यलिंगकानुमितित्वप्रकारकेच्छाया अप्युत्ते
जकत्वापत्तिरिरितीलिंगोदासीनायाः पर्वतेवह्न्यनुमितिर्ज्ञायतामितीच्छाया अ संग्रहापूहायत्तेराह॥ तदन्यमात्रेति॥ तथा च तदन्यमात्रलिंगकायाऽनुमित्सा
तदन्यालिंगोदासीनानुमित्सापीतिनतस्या असंग्रह इति भावः॥ धूमेन वह्निमनुमिनुयामालोकेन च वह्निमनुमिनुयामित्साकारकसमूहालंबनेच्छासंग्रहाय मात्रेति।
तल्लिंगवच्छेदकावच्छिन्नलिंगकात्वाप्रकारकत्वे सति तदन्यलिंगतावच्छेदकावच्छिन्नलिंगकत्वप्रकारिकायाश्च तल्लिंगत्वावच्छेदकविशिष्टलिंगकत्वाप्रकारकत्वे स
ति तद्विरुद्धधर्मविशिष्टलिंगकत्वप्रकारकप्रकारिकायाइच्छा तदन्यानुमित्सेत्यर्थः तेन यत्र धूमत्वावच्छेदेनैव व्याप्यत्वपरामर्शो न तु द्रव्यत्वावच्छेदेन तत्र द्रव्यत्वावच्छिन्नलिं
गकवह्न्यनुमित्साया अपिविरोधित्वात्तस्या अपिवारणाय च द्रव्यत्वस्य लिंगतावच्छेदकत्वात्तु स्तोरिवनी द्रव्येणाच वह्निमनुमिनुयामितीच्छा तस्याः संग्रह॥ न वाप्य
त्वालोकत्वस्यावच्छेदकत्वात गाहिनीस्त्रालोकेन वह्निमनुमिनुयामितीच्छा तस्याः संग्रहः यदि च धूमेनालोकेन च वह्न्यनुमितिर्जायतामितीच्छा धूमलिंग
कानुमितौऽत्तेजिकातदा तल्लिंगतावच्छेदकावच्छिन्नलिंगकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सतीति प्रथमसतीति प्रथमसत्त्वेन वक्तव्यं धूमेन आलो
केन च वह्न्यनुमितिर्जायतामितीच्छायां तु धूमलिंगकत्वे सत्यालोकलिंगकानुमितित्वोद्देश्यतावच्छेदकं न तु धूमलिंगकानुमितित्वमिति तत्सुदासः यदि च

५०

वेराच वह्निमनुमिनुयां आलोकेन वह्निमनुमिनुयामितीच्छापि धूमलिंगकानुमितावुत्तेजिका तद्वान् तल्लिंगकत्वावच्छेदेन विरहविशिष्टलिंगकानुमितित्वावच्छिन्नानु
देश्यकत्वे सतीति सत्संनेन विवक्षणीयं सर्वत्र अविरुद्धत्वं विरुद्धत्वं च वेद्यत्वनिर्वेकेको ध्वंसेतेन द्रव्यत्वादिधूमत्वविरुद्धत्वभ्रमदशायां द्रव्येणा वह्निमनुमिनुयामितीच्छा
यामप्युत्तेजकत्वात् संग्रहः। वह्निव्याप्यधूमवान् पर्वत इति परामर्शसत्त्वे सिद्धिसत्त्वे महानसीयधूमेन वह्न्यनुमितिर्जायतामितीच्छापि यदि नोत्तेजिका तत्पर्व
तीयधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्रकारिकाया तदन्यत्वं विशेषणीयं एवं पूर्वकालीनपर्वतीयधूमेन वह्न्यनुमितिर्जायतामितीच्छायां यदि नद्वि
यतत्कालीनधूमपरामर्शाद् अनुमितिस्तदैव तत्कालीनधूमलिंगकानुमितिं प्रति एतत्कालीनधूमलिंगकानुमितित्वावच्छिन्नानुद्देश्यत्वे सति एतत्कालीनधूम
त्वविरुद्धधर्मविशिष्टलिंगकानुमितिं प्रति एतत्कालीनधूमलिंगकानुमितित्वावच्छिन्नानुद्देश्यत्वे सति एतत्कालीनधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमिति
प्रति एतत्कालीनधूमलिंगकानुमितित्वावच्छिन्नानुद्देश्यत्वे सति एतत्कालीनधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्रकारिकायास्तदन्यत्वं प्रत्येकं एवं म
तिपद्ध्वास्तिरपि बोध्येति। नन्वेवं धूमलिंगकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति पाधूमत्वभिन्नधर्मावच्छिन्नलिंगकानुमितित्वप्रकारिकायावत्। तल्लिंगतावच्छेद
काविरुद्धधर्मविशिष्टलिंगकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति धूमत्वविरुद्धधर्मविशिष्टलिंगकत्वप्रकारिकान्तद्भयभिन्नायाः पर्वतेत्र वह्निमनुमिनुयामितीच्छात्तदभाव
विशिष्टसिद्ध्यभावः पर्वते वह्निमानित्यनुमितौ पक्षत्वेसागतेतद्यावत्सिद्धिसत्त्वे आलोकेन वह्निमनुयामितीच्छासत्त्वे आलोकपरामर्शाद् अनुमितिर्न स्यात् इति
रूपपक्षताभावात् तत्र आह। लिंगविशेषणतायामिति तथा च धूमलिंगकानुमितौ सा पक्षता आलोकलिंगकानुमितौ तु धूमपदस्थाने आलोकपदं प्रक्षिप्य विशिष्ट रा.म०

पक्षतायां हेतुत्वं बोध्यमिति। अपि नापक्षमेशादिसंग्रहः। ननु तल्लिंगकानुमितौ तदन्यमात्रलिंगकानुमितीच्छान्यानुमितीच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वापेक्षया
लाघवात् सिद्धिविशिष्टतदन्यमात्रलिंगकेच्छाविरहत्वेन हेतुत्वमुक्तं न च तत्रापि सामान्यतः ननु पक्षकृत तत्साधकानुमितित्वावच्छिन्नं प्रति तत्पक्षक तत्साध्यकप
क्षताविकारणतांतरकल्पनागौरवे लिंगभेदेनानंत कार्यकारणभावे पि उत्तेजिकान्तनेनानुमानदर्शेच्छासुत्तादर्शेच्छात्वस्य विशेषणत्वापेक्षया सर्वसा
धारणस्यैककार्यकारणभावस्य च कल्पने लाघवादित्याशये हेतल्लिंगकानुमितावितिसिद्ध्यभावसत्त्वेनापरामर्शसत्त्वे प्यनुमितस्याद्दाहः सिद्धि
कालीनेति सिद्धिविशिष्टस्यर्थः तनपत्राविरलक्कमेणसिद्धिभिन्नलिंगकसिषाधयिषाधूमलिंगकपरामर्शः तत्रसिद्धिनाशक्षणोत्पादे शाहासत्त्वेप्य
नेतरेधूमलिंगकानुमितौ न दोषः धूमेन वह्निमनुमिनुयां आलोकेन वह्निमनुमिनुयामिति समूहालंबनेच्छायाः सिद्धिविशिष्टायाः प्रतिबंधाद
हतल्लिंगकानुमितीच्छाविरहविशिष्टेति। विशिष्टत्वं च एककालावच्छेदेनैकात्मवृत्तित्वं धूमत्वावच्छिन्नधूमलिंगकानुमितित्वावच्छिन्नोद्देश्य
कापाइच्छा तद्विरहविशिष्टापाधूमत्वभिन्नधर्मावच्छिन्नलिंगकानुमितित्वप्रकारकेच्छायावधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्रका
रकेच्छा सहन्यलिंगकेच्छात्वेनाविवक्षितत्वात् उभयस्यानिरुक्तरूपेणाभावद्वयमेव कारणं प्रतिपदप्रयोजनं तु प्रागेवोक्तं साधकमानपदस्य प्रमाणपरत्वे
सिसाधयिषाविरहकालिकसाध्यनुमितिर्न स्यात् अनुमानप्रमाणासत्त्वात् तत्राह माधवत्वनिश्चयपदेति पाषाणेतिपाषाणमयो वह्निमान् पर्वतस्तेन रत्वीति

५२ वासिद्धावपि पर्वतो वह्निमानिति सत्त्वनुमितेः पक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टसाध्यवत्तनिश्चयरूपसाधकमानयत्रापीत्यर्थः । इदमुपलक्षणं साध्यतावच्छेदकसं
बंधपक्षतावच्छेदकसंबंधा अपि निवेशनीयाः । अन्यत्र पर्वतान्तरे तादृशानुमितिः सामानाधिकरण्येनानुमितिः । एकत्र साध्यसिद्धौ पर्वतान्तरे अवच्छेदकावच्छेदेन
साध्यसिद्धौ विवादाभावादिति तदेतन्न्यायपर्वतत्वसामानाधिकरण्येन तत्पर्वतत्वविशेष्यकवह्न्यनुमितिं प्रति पर्वतत्वरूपेण तत्पर्वतविशेष्यकवह्निनिश्चयत्वेन
प्रतिबंधकत्वमित्यर्थः । नान्यथेति अनुमितेरानुभविकत्वाभावेन प्रवेशनीयमित्यर्थः । तदवच्छेदेन पक्षतावच्छेदकावच्छेदेन सिद्धेः साध्यसिद्धेर्विरोधित्वमित्यन्व
यः । तत्सामानाधिकरण्यमात्रेणेति पक्षतावच्छेदकावच्छेदेन साध्यानुमितावपि पक्षतावच्छेदकसामानाधिकरण्येन साध्यावगाहित्वसत्त्वादाह मात्रेति सि
द्धिमात्रस्येति मात्रपदेन कृत्स्नार्थकं तथा च साध्यपक्षतावच्छेदकावच्छिन्नत्वानवगाहितत्सामानाधिकरण्यावगाहि अनुमितिं प्रति पर्वतविशेष्यकवह्नि
निश्चयत्वेन विरोधित्वमित्यर्थः । इत्थं चेति सामानाधिकरण्येन सिद्ध्यनन्तरं तदवच्छेदेन सिषाधयिषायामपि सामानाधिकरण्यमात्रेणानुमित्यदर्शना
त्सामानाधिकरण्यमात्रेणानुमितिं प्रति पक्षतावच्छेदकावच्छिन्नत्वानवगाहितत्सामानाधिकरण्यावगाहिसिषाधयिषाविरहविशिष्टनि
श्चयसिद्ध्यभावत्वेन हेतुत्वे एवमवच्छेदकावच्छेदेन सिद्धिसत्त्वे सामानाधिकरण्यमात्रेण सिषाधयिषायां अवच्छेदकावच्छेदेनानुमितेरनुदयात् पक्ष
तावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छिन्नत्वानवगाहित्वप्रकारकपक्षतावच्छेदकसामानाधिकरण्यावगाहित्वप्रकारकानुमितीच्छावि
रहविशिष्टपक्षतावच्छेदकावच्छिन्नसिद्ध्यभावत्वेन हेतुत्वं तन्नावच्छेदकत्वावगाहित्वं तदभावानवगाहित्वात् शुद्धसामानाधिकरण्येन सिषाधयिषायामत्र रा म०

वच्छेदकावच्छेदेन सिषाधयिषायाश्च संग्रहः । ग्रह्यो उभयत्र पक्षतावच्छेदकसामानाधिकरण्येनैव इच्छा उत्तेजिकानुमितिसामान्यं प्रति तादृशसिषाध
यिषाविरहविशिष्टपक्षतावच्छेदकावच्छिन्नसिद्ध्यभावत्वेन सामानाधिकरण्यमात्रेणानुमितिं प्रति सिषाधयिषाविरहविशिष्टसिद्धिसामान्याभाव
त्वेन हेतुत्वं । अवच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धिकालीनायाः सामानाधिकरण्यमात्रेणानुमित्सायाः पृथगेव प्रतिबंधकत्वं ए
वं सामानाधिकरण्यमात्रेणानुमितिं प्रति सिद्धिसामान्यकालीनायाः अवच्छेदकावच्छेदेन सिषाधयिषायाः पृथगेव प्रतिबंधकत्वमिति संक्षेपः । साध्यवि
शेष्यकानुमितिः ॥ पक्षविशेष्यकैवेति ॥ एवकारेण साध्यविशेष्यकव्यवच्छेदः । प्राचीनमतमिति साह एवं चेति नवीनमते तु पक्षविशेष्यकत्वमेव नि
यतं अत एव वह्न्यनुमित्सायां अनुपनीतमानत्वं पूर्वपक्षयन्ति अन्यथा साध्यविशेष्यकत्वे सन्निकृष्टविशेष्यकज्ञानजनने चक्षुषोऽसामर्थ्या
दुक्तपूर्वपक्षावतारः स्यादिति तु लभ्यापत्तिं दर्शयति ॥ समानाकारेति ॥ साध्यप्रसिद्धौ सत्यां साध्यविशेष्यकैवानुमितिः तदभावे तु साध्यवि
शेष्यकैव अत एव ज्ञानेऽप्रामाण्याभावस्य प्रसिद्धाभावविशेष्यकानुमितिरिति मतं जनाह ॥ तादृशेति साध्यविशेष्यकेत्यर्थः । सिद्धिपदेन प
क्षसाध्यनिश्चयस्योक्तत्वात् पक्षवैशिष्ट्यावगाहित्वस्य निवेशो निरस्यते ॥ साध्यप्रसिद्धिरिति ॥ अत एव ॥ साध्यप्रसिद्धिमात्रस्य साध्यविशेष्यका
नुमितिविरोधित्वादेव ॥ तथा च भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसिद्ध्या भावसाध्यकस्थल एवोक्तक्रमेणानुमितेर्विधानात् साध्य
विशेष्यकानुमितिं प्रति साध्यप्रसिद्धिमात्रस्य विरोधित्वेन ज्ञानेऽप्रामाण्याभावस्यानुमितिं प्रति अप्रामाण्याभावप्रसिद्धिरेव न विरोधित्वे अप्रामा

भा० णाभावपक्षेऽप्राधिमत्वसंबंधेन ज्ञानसाध्यकानुमितेरपि तदाकारतयानामसविरोधित्वात्तन्नापि ज्ञानेऽप्रामाण्यव्यापकाभावप्रतियोगिमद्विशाकारकपरामर्श
जन्यत्वात्तस्यानुमितित्वेन प्रतिबध्यत्वं ज्ञानेऽप्रामाण्यव्यापकाभावप्रतियोगिमत्त्वं अप्रामाण्याभावो ज्ञानीयत्वव्याप्यवानिति समूहालंबनात्मकपरामर्शजन्या
५२ नुमितिंप्रसविरोधित्वात् किंतु ज्ञाननिष्ठोद्देश्यत्वावगाह्यप्रामाण्याभावमिष्टविधेयत्वावगाहिनी ज्ञानेऽप्रामाण्याभाववत्ताकारकानुमितिंप्रति साध्यप्रसि
द्धिविरोधित्वं अप्रामाण्याभावपक्षकज्ञानसाध्यकस्थले त्वप्रामाण्याभावस्योद्देश्यत्वे ज्ञानस्य विधेयत्वेऽभासते उद्देश्यत्वविधेयत्वे च स्वरूपसंबंधावि
शेषः प्रतीतिसाक्षिकः अनुमितेरुपक्षस्योद्देश्यत्वं साध्ये च विधेयत्वं भासते न अप्रामाण्याभावे ज्ञानव्याप्यवत्ताज्ञानजन्यत्वे अप्रामाण्याभावे ज्ञानी
यत्वावगाहिज्ञानजन्यत्वे च सति ज्ञानेऽप्रामाण्याभाववत्ताकारकानुमितित्वावच्छिन्नं प्रतितत्यात्वं ज्ञानीयाप्रामाण्याभावत्वेन पक्षतानादृत्यानुमिति
वारणाय द्वितीयं सत्यंतं न च सविवादेनेति व्याप्तिस्मरणादिनेति उसादृक्समनियमाद्युक्तं अनुमित्सोत्तरोसत्वैवेति त्वनुमित्सायोग्यपत्तपेरखेवकारार्थं तत्पेवत्र
नुमित्सांतरोसादेनैव योग्यत्वाबाधितिउत्तेजकत्वेनेति प्रोषः साचेति स्वेन अनुमित्साउत्पत्तिपदे उसादृक सामग्रीपरं तेनानुमित्सोसतिकालेपिपक्षता
अनुमित्सापूर्वकालवारणायएवं प्रतीके अनुमितिउत्तरकालवारणाय विशेष्यं तत्रापि प्रात्यक्षिकादिसिद्धिसत्वेपक्षतासेपत्रपेरखविषयेति
द्विवसादीतितत्रानीमनुमित्सनुदयस्यानुभवाविकत्वार्थं अनुमित्साविषयपक्षिध्यनुत्पादकालसंपादनायेंद्रियादिनेति अनुमित्सनं
तरमिति अनुमित्सोसादृकसामग्र्यनंतरमित्यर्थः तेनानुमित्सोत्पत्तिकालस्यापि संग्रहः ननुव्याप्तिघटकीभूतयदार्थोऽनात्मिकोपस्थितावनुमित्सा रा म०

नंतरं कदाचिदुपप्रेक्षणादनंतरमपि परामर्शो भवतीत्यत आह उत्सर्गतः इति इच्छा लिंगदर्शनेन व्याप्तिस्मरणाद्याप्तिविशिष्टधूमस्मरणंततो वह्निव्या
प्यधूमवानयर्वत इति विशिष्टवैशिष्ट्यबोधात्मा परामर्श इति स्मरणापेक्षकात्मककाल एवौत्सर्गिक इति भावः नन्वेतादृशाकालस्य कथमुत्तेज
कत्वमत आह फलबलेनेति ननु अनुमित्सोत्तरं स्मरणादिकसमकमध्येऽप्यनुमितेरनुभविकत्वात् तत्साधारण्याय हायवेति तुल्यन्यायत्वपा
उत्तेजकत्वत्प्रतिबंधकेपि योग्यतामाह यदिचेति ननु सिषाधयिषानंतरं किंज्ञात्मकः किंवा स्मरणाद्यात्मकः कालउत्तेजक इति कथमवधार
णीयः एवं सिद्ध्यनंतरं स्मरणचतुष्टयात्मकः स्मरणघटकात्मको वा कालः प्रतिबंधक इत्यपि कथमवधारणीयमत आह विशिष्य स्मरणानियमसि
त्तिवदेतीति अत्रायमस्वरसः विशिष्य स्मरणानियमोनस्मरणादिद्वारावधारणा एवमेकस्य सिषाधयिषायामुत्पन्नायामप्यन्यस्य सिद्धिसत्वेऽनुमि
तेरनुदयात् तत्पुरुषीयसिषाधयिषानंतरं तादृशस्मरणाभावविशिष्टसिद्ध्यभावस्य तत्पुरुषीयानुमितिं प्रति हेतुत्वेवाच्येऽतीव गौरवमि
ति अनुमित्सायां सत्यां तादृशप्रत्यक्षादिसत्वेऽप्यनुमित्सासत्त्वादाह साध्यनिर्णय इच्छानंतरमिति पूर्वोक्तन्यायेनेति सिषाधयिषाकालीनविशे
षणज्ञानेन सिषाधयिषाकालीनेंद्रियसंनिकर्षेण च यत्र वह्निमान् वह्निव्याप्यधूमवांश्च पक्ष इत्याकारकं प्रत्यक्षं स्मरणं वेत्यर्थः अनुमित्साया
मपि स्वविषयसिद्ध्यनुपहितत्वाद्विशेषणादानायेमाह यत्रवेति वह्निमान् वह्निव्याप्यवान् वह्निव्याप्यवांश्च पर्वतः पर्वतपक्षकवह्नित्वव्याप्यानुमि
तिरिष्टसाधनमित्येकं स्मरणं यत्रेत्यर्थः तत्रेच्छासामग्र्या अनुमितिविरोधित्वस्य सिद्धत्वादनुमित्सोत्पत्तिकालवृत्त्यनुमितेर्वारणाय सत्यंतं वह्नि

भा०
५३
विषयकत्वोपादानं वह्नित्वव्याप्यवत्त्वानुमितिसामग्रीसंपादनाय वह्निव्याप्यवत्त्वव्याप्यवत्त्वविषयकत्वोपादानं उभयानुमित्यसंपादनाय उभयानुमितौ इष्टसाधनताविष-
यकत्वसमुपात्तं अत्र वस्तुतोऽनुमितेरेव परामर्शात्मकतया सर्वथा परामर्शाभावेऽपि सन्निविरहदशाभावाच्च सुतरामिति सिषाधयिषानन्तरक्षणावच्छिन्नकालस्यैव सि-
षाधयिषापदार्थत्वात् अनुमित्यव्यवहितप्राक्कालेऽपि इच्छाविरहेऽपि न क्षतिः सुतरामेवानुमितिप्रसंगात् इत्यत आह स्वयं अनुमित्सानन्तरं प्रत्यक्षादिसिद्धिसत्त्वेऽप्यनु-
मित्सुतादशायां तादृशेच्छाविषये सिद्धिविशेषणतान्तद्विशेषणतापक्षसाध्यभेदेनेति। उपलक्षणमेतत् संबंधभेदोऽपि द्रष्टव्यः। यत्र यत्पक्षकयत्साध्यकस्या-
नुमितेरेवादिति सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य सिद्ध्यभावेऽतो षाविरहविशिष्टतादृशसिद्ध्यभावस्यापि नाधिकमिति एवं यत्पक्षकय-
त्साध्यकसिद्धिकाले नियतः परामर्शाभावः तत्र सिद्ध्यभावोऽपि न कारणं न चैतत्साध्यकतत्पक्षकतत्पक्षकस्थलेऽपि परामर्शसिद्ध्योर्योगिना-
मेव संभवात् कथमित्यादि निर्वाच्यं एवमपि यत्र विषयविशेषे विषयविशेषस्य अप्रमानुमितित्वं तत्र सिद्धिकाले परामर्शाभावस्यासपदत्वात्
योगिनां भ्रमाभावात् अन्यत्र सिद्धिकाले परामर्शाभावेनैव स्यादिति प्रयोजनाभावादिति सिद्धिकाले अनुमित्साधीनपक्षतया अनुमितिसंघटं-
नमेवं तत्प्रयोजनेन चेत्तत्र न संभवतीति भावः। उक्तिसाधारणपदं तेन मात्रपदे नार्थे संपद्यच्छेदः ईश्वरस्य व्यवस्थापनेन विनात्तदिच्छानिर्वचनापि
दुर्घट इत्यत आह व्याप्यस्येति। सिषाधयिषाविरह इति सिषाधयिषाविरहविशिष्टो यः स्वक्षणः तदव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकं यद्य- रा म०
त्र सिद्ध्यभाव सिद्धिः सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षताऽस्यार्थः एतन्मते सिषाधयिषानाम्नीपि सिद्धिसत्वेऽपि त्रिक्षणमध्येऽप्यनुमितिं सो-

काराः अत एवं तत्रैव मिलितस्य प्रतियोगित्वप्रसिद्धिः अनुमित्यव्यवहितप्राक्काले सिषाधयिषाविरहविशिष्टायाः सिद्धेस्तन्मिन्नसिद्ध्यु एवं पक्षताप्रतियो-
गित्व इति द्वितीयसिषाधयिषाविरहविशिष्टयदक्षणव्यावृत्तिं मद्र्शोपपत्तेरेव प्राथमिकसिषाधयिषाविरहविशिष्टयत्क्षणव्यावृत्तिं प्रदर्शयितुं एकक्षि-
त्यपेति। तृतीयक्षणस्यैव च घटको यो द्वितीयक्षणस्तत्रैकस्यैव तथा च द्वितीयक्षणेनाव्यवहितत्वात् तृतीयादिक्षणानामव्यवहितत्वमित्यर्थः
सिध्यनन्तरं क्षणविलंबेन सिषाधयिषायां सहजतत्त एव सिद्ध्यभावाधीनपक्षतासत्त्वमित्यत उक्तमविरलक्रमेणेति सिषाधयिषेति। अत्र च सिषाध-
यिषाविरहविशिष्टस्वक्षणात् सिद्धस्तन्निक्षणानां तदव्यवहितोत्तरक्षणोत्पन्नानुमितेरुक्तिरिति भवति सा सिद्धिः सिषाधयिषाविरहविशिष्टस्वक्षणा-
व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना तस्याविशिष्टाभावो पयत्तये द्विता यविशिष्टात्मिसार्थः स्वक्षणस्येति सिद्धिक्षणस्येत्यर्थः यत्र
क्रमेणेति सिषाधयिषाणां क्षणानामसंभिकसिद्ध्युत्पत्तौ पक्षता संपत्तिरुक्तविशेषणेनापि न संभवति अत उक्तं क्रमेणेति अविरलक्र-
मेणेत्यर्थः एवं सिद्धिपरामर्शयोः समूहालंबनत्वे स्वक्षणाव्यवहितक्षणोत्पत्तिकानुमितिकैव सा सिद्धिः स्यात् तस्य सिद्धेरभावः सहजत-
एवास्तीति तदर्थं विशेषणानमकत्वं स्यादतस्तत्रापि क्रमो विवक्षितः तथा च सा सिद्धिः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिका न भव-
ति स्वक्षणाव्यवहितक्षणोत्पन्नत्वात् परामर्शस्यैवोत्पादादनुमित्यव्यवहितप्राक्क्षणावृत्तित्वात् सिषाधयिषाविरहविशिष्टाया एव सत्त्वात् ता-
विशेषणोपादाने। स्वक्षणोत्पत्तिकत्वं च न स्मिन्न इत्युत्पत्तिक्षणस्य न सिषाधयिषाविरहविशिष्टत्वं सिषाधयिषाविरहविशिष्टस्यस्वस्थितिक्षणस्याव्यवहि-

भा० तोत्तरक्षणोऽनुमित्सुसत्त्विरिति सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकैव सा सिद्धिः तदन्यसिद्धेरभावः सहजनत्वासत्त्वेति भवति पक्ष

५४ तेत्यर्थः तदव्यवहितोत्तरत्वं तद्ध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तद्ध्वंसाधिकरणत्वं तथा च यत्र सिषाधयिषाविरहपरामर्शोऽनुमितयः तत्र सिद्धिस्थि

तिकाले विनष्टा सिसत्तिकालपर्यंतस्थायी यत्किंचिद्धात्मकः कालोपाधिः तत्पूर्वकाले सिषाधयिषाविरहविशिष्टत्वात् स एव सिषाधयिषावि

रहविशिष्टस्वकालस्तदव्यवहितोत्तरक्षणः सिद्धिस्थितिक्षणः परामर्शोत्पत्तिक्षणस्तत्रानुमितेरनुत्पादात् सिषाधयिषाविरहविशिष्टस्वकालाव्यवहि

तोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाऽप्येव सा सिद्धिस्तस्याश्च सिषाधयिषाविरहविशिष्टायाः एव पूर्वकालेसत्त्वात् पक्षता न स्यादतः प्रथमक्षणाप

देनैव सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरकालस्तादृशाव्यवहितोत्तरक्षणपर्यंतस्थायी तत्पूर्वकालस्थायी स्थूलकालोपाधिः त

यावता दृशस्थूलकालोपाधिमादाय सर्वैव सिद्धिः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरकालोत्पत्तिकानुमितिकेति तदन्याप्रसि

द्धिरीश्वरस्यैव तितस्याद्दृश्वरीय सिषाधयिषाविशिष्टाया एव सत्त्वेन सिषाधयिषाविरहविशिष्टत्वाद्दृशासिद्ध्यप्रसिद्ध्याऽसंभवस्तत्तो द्वितीयक्षणाय दे

पर्वतो वह्निमानित्यनुमित्सनेतरं विनष्टपदस्य पूर्वपरामर्शेनानुमित्सेतरायत्तिः अनुमित्सात्मकसिद्धेः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहि

तोत्तरक्षणावर्तित्वात्मकानुमितिकत्वेन तदन्यसिद्धेरभावसत्त्वात् तादृशस्वक्षणाव्यवहितोत्तरक्षणावर्त्तित्वभिन्नानुमितिकत्वविवक्षणेऽपि यत्र

पर्वतो वह्निमानित्यनुमितिरपि साक्षुद्धिरूपा तदुत्तरं च पर्वतो वह्निमान् वह्निव्याप्यधूमवानिति परामर्शिकी सिद्धिरप्यपेक्षावुद्धिरूपा तत्र तादृशानुमितिनाशानं राम०

तरं प्रत्यक्षात्मकसिद्धिसत्त्वेऽप्यनुमितिप्रसंगः प्रत्यक्षात्मकसिद्धेस्तादृशस्वक्षणाव्यवहितोत्तरवर्तित्वभिन्नानुमितिकत्वेनाप्रतिबंधकत्वात् तदुत्पत्तिके

ति अनुमितिपदं च प्रकृतानुमितिपरं अन्यथा वह्न्याभावान् च वह्निमान् पर्वतो घटव्याप्यवानिति प्रत्यक्षस्वक्षणाव्यवहितक्षणोत्पत्तिकघटानुमिति

कत्वेन वह्न्यनुमितिविरोधित्वेन तत्रापि पक्षताप्रसंगादिति। यत्रानुमित्सेसाध्यानुमित्यात्मकसिद्धेरनुमित्सापाः फलोपहितत्वेनानुत्पत्ति

कत्वं स्यादतः प्रात्यक्षिकीति अनुमित्सात्माप्राक्कालवृत्तित्वेन तादृशासिद्ध्युत्पत्तिक्षणस्यानुमितिप्राक्क्षणस्य च सिषाधयिषाविरहविशिष्टत्वेस्त्वृवि

ते अथ परामर्शोऽनुमितिसत्त्वेन सिद्धिः परामर्शाव्यवहितत्वेन तादृशक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वेस्त्विति द्वितीयमेवे है

ति तथा च स्वाधिकरणक्षणोत्तरत्वशक्तित्वेन उपादायाव्यवहितोत्तरत्वं निर्वाच्यं अन्यथा स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिक

रणत्वसत्त्वे तीपक्षणोः संभवेनासंगतत्वापातात् तत्तद्व्यक्तित्वेनोपादानेन स्वाधीकरणीभूततत्क्षणध्वंसाधिकरणक्षणध्वंसानधिकरण

त्वे सति तादृशक्षणध्वंसाधिकरणत्वं तत्तीपक्षणोऽपि चिकलमितिभावः तत्तद्व्यक्तित्वेन निवेशे गौरवादाह स्वध्वंसेति स्वःसिद्धिः विषयितापास्व

ध्वंसाधिकरणज्ञानध्वंसाधिकरणत्वासंभवदतः कालेहि कालिकसंबंधेनाधिकरणत्वप्रापके तत्र गुरुत्वात् क्षणत्वेनोपात्तस्वध्वंसाधिकरणकालः

स्वत्तीपक्षणाः न ध्वंसानधिकरणत्वे सतीत्यर्थः तेन चतुर्थक्षणाव्युदासः स्वपूर्वकालवारणाय विशेषणं तत्रापि स्वाधिकरणज्ञानध्वंसवत्त्वात् तका

लेति स्वाधिकरणत्वेनैव पूर्वकालवारणेऽपि अनुमित्सुसत्त्विक्षणावारणाय गुरुतरारंभः अन्यथा तत्रानुमितेरपि तादृशाव्यवहितोत्तरत्वोत्पत्तिकानुमितिकत्वेन

भा०

५५

तद्भिन्नसिद्ध्यभावसत्त्वादनुमित्सानन्तरं पुनरनुमित्सापत्तिः स्यादिति तन्निवेशः स्वक्षणस्य सिषाधयिषाविरहविशिष्टत्वं यत्र क्षणे सिषाधयिषा प्राक् सिद्धि
सिद्धिपरामर्शानुमितयस्तत्र तादृशसिद्धेः निरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन तद्भिन्नसिद्ध्यभावस्य सत्त्वादतः प्रकारान्तरेण तत्प्रयो
जनमाह तथा चेति सिद्ध्यनन्तरं तृतीयक्षणे सिषाधयिषायां सिषाधयिषातृतीयक्षणेऽनुमित्सुत्पत्तौ वा सिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्ति
कानुमितिकत्वेऽघटत्वसत्त्वेऽतः क्रमेणेति ॥ अविरलक्रमेणोत्पत्तौ प्रथमक्षणे इति तादृशसिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिक
त्वेन तद्भिन्नसिद्ध्यभावस्य प्रथमक्षणेऽपि सत्त्वादित्यर्थः उत्तरक्षणस्येति स्वक्षणस्य विशेषणत्वात्तादृशसिद्धेरुत्पत्तिक्षणस्य सिषाधयिषावि
रहविशिष्टत्वेन प्रथमक्षणोत्पन्नपक्षतावारणासंभवादिति उत्तरक्षणस्य तादृशसिद्धेर्व्यवहितोत्तरक्षणस्य तथात्वे तादृशसिद्धेरव्यवहितोत्तरक्षणा
स्य सिषाधयिषाविशिष्टत्वेन सिषाधयिषाविरहविशिष्टत्वस्य स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकेऽपघटकत्वेन तदुक्त्वायातात्तादृशसिद्धेः
प्रथमक्षणोत्पत्त्वान्न पक्षतेति भावः द्वितीये तु सिद्धेर्विशेषणानि त्वनुपपत्तेस्तु यदुत्पत्तौ तत्रैव निरुक्तप्रयाना तादृशसिद्धेः प्रथमक्षणस्य स्वव्यवहितोत्तरक्षणो
पिसत्त्वान्न पक्षतास्यादिति भावः इच्छाजनिकेति तथा च प्रथमक्षणोत्पन्नपक्षतासत्त्वेऽपि न क्षतिः । तदानीमनुमित्सुत्पादस्य इच्छानन्तरमाप्रति
बंधेनैवाभावादिति भावः इच्छाघटितसामग्र्या एव प्रतिबंधकत्वे दृष्टेन स्विच्छासामग्र्याः दृष्टसत्त्वत्वेन प्रतिबंधकत्वस्य संदिग्धत्वात्तादृशेऽपि तु पदं पुन
रितितदात्मनुमीतीयघटितयत्रापसानुद्दिष्टासिद्धिसत्त्व इष्टसाधनताधीस्ततः सिषाधयिषा ततोऽनुमितिस्तत्र तादृशसिद्धेरपि निरुक्तस्वक्षणाव्यवहितोत्तर शु म०

क्षणोत्पत्तिकानुमितिकत्वेन तद्भिन्नसिद्ध्यभावस्य प्रथमक्षणेऽपि सत्त्वादिच्छासामग्र्यभावादिष्टसाधनताधीकालेऽनुमित्सापत्तिः अत इच्छासामग्रीप्रतिबंधकत्वेऽपि सि
षाधयिषाविरहविशिष्टत्वविशेषणं तत्राव्यवस्थकेन तथाप्यपेक्षानुमित्सापत्तिः अत इच्छासामग्रीप्रतिबंधकत्वेऽपि सिषाधयिषाविरहविशिष्टत्वविशेषणं तत्र तत्र
वश्यकं तथाप्यपेक्षानुद्दिष्टस्येति प्रसक्तान्यथानुपपत्त्या लक्षणात्रयावस्थापि तु तत्र च तादृशमनसः भावान्न क्षणत्रयस्थापितेऽद्य समिमिसेतत्तदुक्तेः साव्यव
हितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिद्ध्यभावस्य वक्तुं प्रीहिदेयप्रवेशेन गुरुत्वान्तदुपेक्षितेनानुमित्सव्यवहितपूर्वत्वं वक्तव्यमनुमित्सुत्पत्तिका
लोत्पत्तिकध्वंसप्रतियोगित्वं तादृशक्षणावृत्ति सिद्धिभिन्नभिन्नसिद्धीनामभावदत्यर्थः । मात्रपदेन सिषाधयिषाविरहविशेषणव्युदासः सिद्ध्यभावस्य
पक्षतात्वे संपत्तये चरमसिद्धिपदेन तत्साध्यकीकर्त्तुं प्रथमं सिद्धिपदेऽखंडाभावघटकतयापि नैव पर्यन्तथा चानुमित्सव्यवहितपूर्वक्षणावृत्तिसिद्धिभिन्न
स्य परामर्शादेः प्रतिबंधकत्वापातात्त्वरमसिद्धिपदं किंतु अनुमित्सव्यवहितपूर्वक्षणावृत्तिभिन्नसिद्ध्यभावमात्रमिति पाठः ॥ सिद्धिपदस्याखंडाभावसंपा
दकतयानैवयथैतादृशसिद्धिनां सिषाधयिषाविरहविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धीनां निरुक्तेति निरुक्तरूपे
सिषाधयिषाविरहविशिष्टत्वादिरूपेण नन्वनायसेवानंतकार्यकारणाभावोऽस्त्विस्तत आह तादृशेति नन्वनुमित्सव्यवहितपूर्ववर्त्तिभिन्नसिद्धीनां तद्व
त्तित्वेनैवाभावः कारणं अनुमित्सव्यवहितपूर्ववर्त्तितादृशसिद्धौ नानुसिषाधयिषाविरहविशिष्टत्वेन शब्दे क्लमनुपादेयमेवेत्यत आह तत्तदिति प्रात्यनिर्वस्य प्रतिबंध
कत्वलाभाय संबंधे तिपत्र सिद्धिसिषाधयिषानुमितयः तत्र सिद्धेः प्रथमक्षणे एव प्रतिबंधकत्वे तत्रलाघवात्तत्क्षणासंबंधेन पत्नयात्वमस्त्वित्यर्थः । ननु तत्क्षणा
संबंधस्यक्षणान्तरेऽपि सत्त्वात्तदानीमनुमितिर्न स्यात् न च तदात्मीयक्षणासंबंध एव प्रतिबंधक इति वाच्यं तदात्मीयक्षणस्याप्यधिकक्षणतात्मीयतत्क्षणसंबं

भा०

५६

पक्षाभावात्तत्राह तत्तत्समयावच्छिन्नेति तत्तत्क्षणयोगेति पत्रान्तनियतानुमितित्वौ स्वघटितत्वाली यमनोयोगस्य व्यक्तित्वेनोपादेयत्वस्य चैत्रादिनात्तत्वालीपयरिमार्तादि
संग्रहः यद्यप्येवं तत्तत्परामर्शावच्छिन्नसिसिद्धिव्यक्तेरपि प्रतिबंधकत्वमस्त्विति निरामनाविरहात्तथाप्यतादृशानेन प्रतिपदं प्रतिबंधकभावे मानाभावः स्त्रत्रतात्पर्यं अन्यच्च सामान्य
तः प्रकृतानुमितित्वमेव कार्यतावच्छेदकं न तु तत्तदनुमितित्वं सामानाधिकरण्यप्रत्यासत्त्या प्रतिबंधकत्वकल्पनात्तु तिप्रसंगाभावो पीतियत्परामर्शादावित्यादिपदेनात्मनोयोगादिप
रिग्रहः नन्वेतत्त्वविशिष्टाभाव एव नियामकः न च नियामकान्तरकल्पने विनात्तदेव दुर्लभमिति वाच्यं तत्स्वरूपसत एव हेतुत्वे नृत्तदज्ञानेपि प्रतिविरहात्तत्रात्राह नवेतिकार्यो
तपात्स्य कारणतावच्छेदककोटिप्रवेशात्तदवच्छिन्नस्य दूर्वकालेऽसत्त्वात्कार्योत्पादानस्मादिसत्तत्त्वं चैनायकारणतावच्छेदकावच्छिन्नसमाजाधीनेस्युक्तकार्योत्पाद
द्विकमित्यादिपदेन प्रतिबंधकसत्ताधीनकार्यानुत्पादपरिग्रहः न चासति तिन्नघासति कारणतावाः फलगर्भत्वेः परामर्शेन संस्कारेणाचात्यावहितोत्तरपरा
नुमित्युत्पादानंतरं परामर्शानंतरेऽनुमितिजननस्य वारणायउत्पत्तिकालावच्छिन्नेति तत्स्पमारात्रिनयान्तिकालोत्पत्तिरात्तेन तादृशास्थूलकालोपाधिमादायनातिप्रसंगः स्वपरा
ति प्रसराः समयः घटज्ञानादेरप्युत्तरपरामर्शसमानाधिकरणात्तनुमित्युत्पादात्तद्वारणाय अव्यवहितेति स्थूलकालत्वाव्यवहितोत्तरकालः स्वकालध्वंसाधिकरणकालध्वंसानधिक
रणात्वे सति तत्कालध्वंसाधिकरणकालः स च द्वितीयपरामर्शाय्यैतस्यापीस्वपूर्वकालस्यापीस्थूलकालोपाधितया च घटज्ञानादेरपि तादृशाव्यवहितोत्तरस्थूलकालो
त्पत्तिकस्य पूर्वकालीनानुमितिकतया तद्वाति प्रसंगः स्यात्ः परामर्शोऽतियत्र परामर्शेनानुमितिः संस्कारस्य एकदैवजनितौ तत्र तद्द्वितीयपरामर्शाव्यवहितोत्तरस्थूलकाला
स्कारेणात्द्वितीयपरामर्शानुमितिजननप्रसंगः स्यात्ः आहउत्पत्तिकेत्ति नियत्र चैत्रस्य घटज्ञानाव्यवहितोत्तरपरामर्शेमैत्रस्यानुमितिस्तत्र तादृशघटज्ञानस्यापि निरुक्तरूपपुरा
लित्वाच्चैत्रस्याप्यनुमितिजननप्रसंगः स्यात् तः समानाधिकरणेति घटव्याप्यवान्हृदं तदतिपरामर्शस्य स्वपरामर्शाव्यवहितोत्तरपरामर्शसत्तिकयानुमितिकस्याव्यवहिता
न्नोत्तरपरामर्शघटनिष्ठत्वाद्प्रसंगः स्यात्ः अनुमितिति प्रकृतानुमितीत्यर्थः यत्र चैत्रमैत्रयोः निद्रितव्यवहितोत्तरपरामर्शेमैत्रस्यानुमितिजातात्तत्र तादृशादित्वस्यापि निरुक्तरूप रा॰म॰

प्रालितात्तेन चैत्रस्यानुमितिजननप्रसंगः स्यात् तः सविषयत्वेनेति सिषाधयिषासंस्कारसाधारण्यायज्ञानत्वमुपेक्षितं एतत्स्य स्वत्व घटितत्वात् इदं कृत्वा हि ह्रदयप्रवेशेन गुरुत्वात् हस
समानाधिकरणेतिस्यम् अनुमितिजनकत्वेनाभिमतपरामर्शादितद्व्यवहितपूर्वत्वे तत्तदुत्पत्तिपरामर्शोत्पत्तिकध्वंसप्रतियोगित्वेऽनुमित्युत्पत्तिपरामर्शोत्पत्तिकध्वंसप्रतियोगिस्थूलु
कालोऽसत्वज्ञानादिवारणाय परामर्शोतियस्य परामर्शस्य संस्कारस्यवान्त्रिमपरामर्श एवानुमितिस्तस्यापि तादृशानुमित्सव्यवहितपूर्वपरामर्शावत्तित्वित्तदुत्पत्ति द्वितीयप
रामर्शनरनुमितिप्रसंगः स्यात्तदुत्पत्त्रेति अत्रोत्पत्तिरूपफलस्यात्तेनोत्पत्तिकालावच्छिन्नस्यापि तार्थकत्वं तत्त्वे विशेषणात्वे तु उत्पत्ति घटकीभूतादत्त्वस्य वै
यर्थ्यापातात्तादृशानुमित्स्व्यवहितपूर्वपरामर्शावत्तित्वविशिष्टत्वे मे वातिप्रसंगाभंगात्ताह किंचैसनेन वस्पत्तेयदन्तरस्य च प्रयोजनत्वेपूर्ववदुक्तेयेन नुच्य
त्राणुयोगितौ त्वमपेवप्रातत्वस्यानुगतस्याभावात् कथमनुगतः कार्यकारणभावः स्यात्तत्राह स्वपरामर्शेति अत्र स्वपादेनयस्य ज्ञानादेरव्यवहिता
रपरामर्शोनानुमित्युत्पादस्तस्यैवाभिधानेनावच्छेदकत्वात् सविषयकत्वस्याचान्नानुगमः अत्रापि स्वपरामर्शसत्त्वपराः समयः अव्यवहितपरद्वितीयपरा
पत्रादिप्रयोजने पूर्ववत्तन्नयम् अत्रापि उत्पत्तिकालावच्छिन्नस्येऽस्यानुषंगतीनपस्य परामर्शस्य संस्कारस्य वाव्यवहितोत्तरपरामर्शोऽनुमितिस्तस्यापि कारणा
तावच्छेदकाक्रान्तत्वात्पुनरनुमित्युत्पादप्रसंगः न चैवमुक्तेः स्वत्वघटितत्वेन कथमेकरूपेणाप्यनुगमइतिवाच्यो त्वाधिकरणसमयध्वंसविशिष्टस
भावकूटस्य विशेषणत्वात् ननु ज्ञानेच्छासंस्कारादिसाधारणत्वसविषयकत्वेनैके अतिरिक्तविषयतायाः अननुगमात् एवमनुमित्स्व्यवहितपूर्वपरामर्शेनियत
तमः सविषयकपदार्थस्योमानाभावाद्वेत्स आह किंचेति अनुमित्स्व्यवहितपूर्वपरामर्शोपरामर्शस्यावश्यकत्वात्तज्ज्ञानत्वघटितैकरूपावच्छिन्नस्यानुमितिजनक
त्वव्यभिचारः एकेनपरामर्शेनानुमितिजननानन्तरं पुनरनुमितिजननस्य वारणाय तादृशाव्यवहितपूर्वपरामर्शावत्तित्वविशिष्टत्वमुक्तेहित्वादिवारणाय ज्ञान
त्वमुक्तेषेषपूर्ववत् आदिपदेन तादृशसंस्कारत्वतादृशसंयोगत्वादीनां संग्रहः ननु पूर्वोक्तस्याव्यवहितोत्तरत्वस्य द्वितीयतनीयपरामर्शासाधारणत्वापादनपरा

५२

भा०

(५)

मर्शेन चिन्नप्रपरस्यैवानुमितिजनकत्वेन द्वितीयक्षणोऽनुमितिजननायोग्यत्वादत आह। अव्यवहितोत्तरक्षणेति। न चावश्यं सर्वेषु स्वाधिकरणकालध्वंसाधिकरणकालध्वंसा
नधिकरणत्वस्य तत्स्वाधिकरणकालध्वंसाधिकरणत्वमेवाव्यवहितोत्तरत्वं वाच्यं तत्रापि विशेष्यपदं स्वाधिकरणत्वेन वस्तु पूर्वक्षणोत्पत्तिवारणाय स्वोत्पत्तिक्षणावारणाय काल
ध्वंसेति तद्वारणाय फलेन अनुमितित्वसन्निकालोत्पत्तिकसंस्कारेणानुमित्युत्तरक्षणोऽनुमित्युत्तरोत्पत्तिवारणायेति। न चाद्विमद्वितीये तृतीयपरामर्शस्यैवानुमित्य
व्यवहितपूर्वक्षणावर्तित्वविशिष्टस्य सत्त्वान्नाप्रसंगः सिद्ध्यादौ तादृशावृत्त्यादिपरिग्रहः। न चाव्यवहितोत्तरक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वादृशानुमितिकत्वा
भावात्। तदानीं परामर्शस्थितिक्षणो। ननु पपन्नकामिनीलौकिकप्रत्यक्षात्मकः परामर्शो जायतामिति चेन्नेत्यन्तरं विनश्यदवस्थस्य सन्निकर्षेण कामिनीलौकि
कप्रत्यक्षात्मकः परामर्शो जायत इति। तत्र द्वितीयक्षणे ज्ञानमात्रस्यैवानुत्पत्तिः कामिनीजिज्ञासायाः एवमनिवेधकत्वात्। न वा पुनः कामिनीलौकिकप्रत्यक्षस्य
कस्याभावात्। तत्र तृतीयक्षणे अनुमितिर्न स्यात् तादृशासविषयकाभावात्। एवं पुत्रजन्मतन्तरपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिः स्पष्टं नाभवत्तिनोक्षुधामन्त्रादिक
गोचाधादिकबाधमनुक्तेन न्यायेनैव तादृशसंस्कारस्य पुनरुपादयति। अनन्तरं संस्कारादिजनितसंभवात् अनुमितिसंभवात् अनुमितिः संस्कारजन्मत्वेन स्मृतित्वाप
त्तिरत आह। संस्कारेति। प्रागेवानुमानेन संस्कारत्वेन संस्कारजन्मज्ञानत्वस्य स्मृतिसामग्रीजन्यत्वस्य वा स्मृतित्वप्रयोजकत्वात् अन्यथा संस्कारजन्यस्य
प्रत्यभिज्ञादेरपि स्मृतित्वापत्तेरिति भावः। ननु उक्तस्य परामर्शस्योपस्थलकपक्षे न तत्संस्कारसंभावना किं वैतादृशपक्षेऽपि अनुपाधिनिस्वत्वमेव शरणमनुगम
दवस्थेनैव सत्तोऽनुगतरूपेण प्रतिबन्धकत्वमाह। स्वाधीनेति। मैत्रीयानुमित्यव्यवहितप्राक्क्षणे तत्र सिद्ध्यादिमत्त्वेऽपि चैत्रस्य सिषाधयिषामनुस्यनानुमित्यापत्ते
राह। स्वसमानाधिकरणेति। स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणावर्तित्वविशिष्टस्य तत्तत्त्वेनेत्यर्थः। स्वसामानाधिकरण्यं च समवायेन तेन स्वाधिकरणा
नुमितेरविषयतया समानाधिकरणत्वेऽपि नक्षतिः न चैवं संदेहपितादृशपूर्ववर्तिभिन्नत्वेन प्रतिबन्धकत्वादनुमितिमात्रस्यैवानुत्पादापत्तिः अनुमित्यव्यवहित रा म०

प्राक्क्षणोत्पत्तिदोषः सत्त्वेऽपि समवायेन तदभावस्य सत्त्वादिति। इदानींतनानां सिद्ध्यादीनां सर्वेषामेव प्रायशस्तादृशानुमितिपूर्वक्षणावृत्तित्वात् स्वपूर्ववर्तिसा
नेतरतृतीयक्षणोत्पन्नध्वंसप्रतियोगिस्थूलकालीयाध्यात्मकतादृशानुमित्यव्यवहितपूर्वकालवृत्तित्वाद्यप्रतिबन्धकतयाऽनुमित्यापत्तेराह। अव्यवहितेति। क्ष
णोत्तिचाव्यवहिताणामिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषोत्पादकाले तत्पुरुषीयसंयोगादिरूपतादृशक्षणानामभावात् सिषाधयिषाप्राक्क्षणावृत्तेनानुमित्य
व्यवहितप्राक्क्षणावृत्तित्वेनाप्रतिबन्धकत्वात् सिषाधयिषासत्त्वकालेऽनुमित्यापत्तिरित्यत आह। स्वसमानाधिकरणेति। तादृशानुमित्यव्यवहितपूर्वक्षणावर्ति
नोऽपि परामर्शस्य तादृशानुमित्युत्पत्तिकक्षणोत्पन्नध्वंसप्रतियोगित्वरूपाव्यवहितपूर्वत्वानधिकरणस्थूलकालमहाकालवृत्तितया प्रतिबन्धकत्वात् स्वानु
मितिकालेऽनुमित्यनापत्तेराह। क्षणेति। क्षणत्वं चाऽत्र स्ववृत्तियावद्रूपविशिष्टसमयत्वे विशिष्टव्यापारेयेः। अन्यथा स्वस्वपूर्ववर्तीत्यादिके क्षणघक्षणाव
च्छिन्नस्थिरस्यापि स्थिरत्वेन तस्य चानुमित्यव्यवहितप्राक्क्षणत्वानिरुक्तानुमित्यव्यवहितपूर्वत्वानधिकरणत्वात् तद्विशिष्टपरामर्शस्य प्रतिबन्धकत्वाद
नुमित्युत्पत्तिक्षणोः न मित्यनापत्तेः। तादृशानुमित्यव्यवहितपूर्वक्षणावर्तिनोऽपि तादृशानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणावृत्तित्वेन प्रतिबन्धकता
दनुमितिकालेऽनुमितिर्न स्यादतो विशिष्टत्वेनेति अनुमित्यव्यवहितप्राक्क्षणावानुमित्यव्यवहितपूर्वकालत्वानधिकरणक्षणावर्तित्वविशिष्टाभावस्य स
त्त्वान्नानुमितिप्रतिबन्ध इति भावः। ननु अनुमित्यव्यवहितपूर्वत्वं अनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं तथा च तदनधिकरणक्षणावृत्तित्वविशिष्टत्वेन क्षण
रूपप्रवेशात् तादृशानुमित्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणावर्तित्वविशिष्टत्वेनैकमात्रक्षणप्रवेशाल्लाघवमित्याशयेनाह। स्वसमानाधिकरणा
नुमित्युत्पत्त्यनधिकरणेति। अत्र क्षणत्वस्ववृत्तियावद्धर्मविशिष्टसमयत्वेन नानुमितिप्राक्क्षणोत्पन्नस्य अनुमितिद्वितीयक्षणोत्पत्तिकनाशप्रतियोगिनोऽपि अनु
मित्यव्यवहितप्राक्क्षणस्य स्वस्वपूर्ववर्तीत्यादिरूपक्षणत्ववतोऽपि अनुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वत्वात् तद्वृत्तित्वविशिष्टत्वेन न प्रतिबन्धकत्व

भा०

५८

मितिप्रसङ्गेनासंभवः। अत्र च क्षणत्वस्य चरमध्वंसे गौरवात्तत्तादृशस्थूलकालाव्यवहितपूर्ववर्तित्वविशिष्टत्वेन प्रतिबंधकत्वे क्षतिविरहात् द्वसमये युक्ते कालिकसंबंधेन
तादृशक्षणस्याधिकरणतायाः अभावस्यात्र तु व्यक्तिकेऽस्य तत्कालिकेऽसंबंधेन तद्व्यक्तिकस्य च तत्त्वाभावात् उपायान्तरे अन्यथा तदुत्तरक्षणानधिकरणसमयस्यापेक्षकक्षानविषयत्वादिसंबंधेना
अधिकरणतया प्रसिद्धिः स्यात्तादृशक्षणस्यानधिकरणत्वेऽनुमितस्य व्यवहितप्राक्क्षणावच्छेदेनान्तरविषयत्वापावन्नमानत्वात्तत्क्षणावृत्तित्वविशिष्टस्य प्रति
बंधकत्वेऽनुमितिक्षणोऽप्यनुमितिर्न स्यादिति। अनुमितिस्थितिक्षणस्यापि अनुमित्साधिकरणत्वात् यासदव्यवहितप्राक्क्षणावृत्तित्वविशिष्टस्य प्रतिबंधकतयाऽनु
मित्युत्तरमनुमित्सायत्तिरत उक्तौ नि। अनुमितिस्थितिक्षणस्याप्यनुमित्सुत्वस्यानधिकरणत्वात् पानदव्यवहितप्राक्कालस्य स्थूलकालोपाधेऽनुमित्साव्यवहितप्रा
क्क्षणोपि सत्वात्तद्वृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वेऽनुमितिकालेऽप्यनुमितिकालेऽप्यनुमितिर्न स्यादतः क्षणेति। अत्र तादृशसमयाव्यवहितपूर्वत्वेन तादृशसम
यासत्तिकध्वंसप्रतियोगित्वेन तु तादृशक्षणोत्पत्तिध्वंसप्रतियोगित्वे गौरवान्निःप्रयोजनत्वाच्च तादृशानुमित्सुत्वानधिकरणस्थूलकालस्योत्पत्तिस्थितिक्षणसा
धारणक्षणसामान्ये सत्तिकध्वंसप्रतियोगिक्षणावृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वे क्षतिविरहादिति रहस्यं च धेयं यत्र पर्वतो वह्निमानिति व्याप्यव्यापनपर्वते
वह्न्यनुमित्सेन रसिद्धसाधनमित्याकारकसमूहालंबनानुमितिस्ततो वह्न्यनुमित्सेनरेजायतामिती छानन्तरं पुनर्वह्न्यनुमितिस्तत्र द्वितीयक्षणोप्यनुमितिप्रसं
गः सोऽपि कथं न स्यादिति यागेन स्थिरस्यैवात्र क्षणावच्छिन्नस्याद्यक्षणावच्छिन्नस्य वा रक्षेत्सत्तिक्षणस्य पूर्वानुमित्सुत्वस्याधिकरणतया आद्यक्षणावच्छिन्नस्यो
त्तरानुमित्सुत्वस्याधिकरणतया तादृशानुमित्सुत्वानधिकरणत्वाभावात् तस्मात्तादृशासिद्धावपि पोत्पत्तिक्षणोनानुमित्सुत्वस्याधिकरणमिति सर्वसामञ्जस्यक
प्रतीतिवत्तादृशक्षणावृत्तित्वविशिष्टस्य सत्त्वादृशानुमित्सुत्वस्यानधिकरणत्वात्तादृक्षणावृत्तित्वविशिष्टत्वावच्छेदेनानुमित्सुत्वस्याधिकरणत्वाभावात् नन्वयासाऽप्युपयस्य
स्थासस्याधिकरणत्वाभावावच्छेदेन तादृशसमयासत्तिकध्वंसप्रतियोगित्वे च तद्व्यवहितपूर्वत्वेनेन स्थिरस्यापि किंचित्क्षणावृत्तित्वविशिष्टस्यानुमित्सुत्वस्यानधिकरणतयानुमि राम०

सव्यवहितपूर्वक्षणस्य तदुत्पत्तिकध्वंसप्रतियोगित्वेऽपि न क्षतिरिति भावः। यद्वान्तरव्यावृत्तिः पूर्ववत्तानन्वनुमित्साव्यवहितपूर्वस्यानधिकरणत्वघटितलक्षणे
तद्व्यवहितपूर्वत्वं तदुत्पत्तिक्षणावृत्तिध्वंसप्रतियोगित्वं तच्चाति पूर्वक्षणस्यापीति तद्वृत्तित्वविशिष्टस्य नाम प्रतिबंधकत्वापत्तिरत आह तद्व्यवहितेति तथा
च ध्वंसस्यानुमित्सुत्पत्तिक्षणावृत्तित्वेपि तदुत्पत्तिकत्वाभावान्न तस्याव्यवहितपूर्वत्वमिति। अनुमितिक्षणोत्पत्तिकध्वंसप्रतियोगित्वमनुमित्सोत्पत्तिक्षणस्यापी
ति तद्वृत्तित्वविशिष्टस्याप्रतिबंधकत्वादनुमित्सोत्तरमनुमित्यापत्तिरत आह उत्पत्तीति सर्वस्यैवास्य क्षणावच्छिन्नक्षणस्यानुमित्सुत्वाधिकरणस्थूलकालस
त्तिकध्वंसप्रतियोगित्वादप्रसिद्धिवारणाय क्षणेति सर्वस्यैव क्षणस्य तदुत्पत्तिक्षणोत्पत्तिकध्वंसात्मकभेदप्रतियोगित्वादप्रसिद्धिरतो ध्वंसत्वनि
रूपितप्रतियोगित्वत्वाभावध्वंसेति। को विज्ञुनतु तद्व्यवहितपूर्वत्वेन तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वमिति तत्प्रागभावा
धिकरणत्वेन तत्प्रागभावानङ्गीकरेन संभवतीत्यत आह तद्व्यवहितत्वाद्युः। न चात्रेति। प्रथमद्वितीयचरमयोस्तादृशपूर्वत्वानधिकरणत्वसिवाध
यिषाप्राक्क्षणावृत्तित्वविशिष्टपरामर्शमेव प्रतिबंधात्र सिषाधयिषासाद्भावेऽनुमित्सुत्वाद्यः स्यादेव स तदुक्तं सिद्धान्तलक्षणेति। तत्पुरुषीयस्यृति।
पुरुषान्तरीयत्वादृशाद्यर्थस्य प्रसिद्धावपि तत्पुरुषसमवायेन तदभावस्य सत्वात्तत्पुरुषीयानुमितिप्रतिबंधरहित भावः। कस्यापीति यद्यपेक्षते किंचि
त्स्यात्तदानेन प्रतिबंधान्न तथात्वनुमितिः स्यादिति प्रतिक्षणाकस्यविद्विनाशायगमपि तदाह्यवत्तिधर्मस्य प्रतिक्षणानाशायगमभावादिति भावः। अनन्तर
चानुमितिरिति अन्यथा परामर्शस्यैवतादृशापूर्ववर्तिभिन्नत्वे स्यादिति तादृशासमय सिषाधयिषासाद्समयोऽसावनुमितिः। अनवरतेति। अनवरतेप
रिस्पंदमनुयः परिमिताः पवनादपरमाणवस्तैः साकं यस्य तनेन संयोगसन्तानः। तदेतः पतिष्यतीनामिसेयः प्रतिक्षणोत्पादशाद्यसंयोगनाशकक्वमोपपाद
नायानवरतेत्युक्तो एकपरमाणुसंयोगकालेऽपि परमाणुन्तरस्य संयोगनाशाभविष्यतोऽस्तित्वप्रतिपादनायापरिमितेति। वायुतेजसोरविलेवगमनशीलत्व

भा० मित्समिप्राप्तेरामयनादीख्युक्तो।नन्तुनेघायतिप्ररणाुपरमेमानाभावदसत्तत्राह।फलानुसारेतिननुतदानीमनुमित्यनुत्पादनायकारणान्तरमेवकल्प्यतांतदभावात्तदानी
५८ नानुमितिरित्यतआहकारणान्तरेतिननुकारणान्तराग्रहसमयएवान्वयव्यभिचारसंदेहःप्रतिबंधकोऽस्त्वतआहअन्वयेति।अन्वयाभावानवगाहित्वादितिभावः।न
नुवस्तव्याप्योतरपावदृढकहेतुसमवधानेदण्डसत्वेघटसत्वमितिज्ञानकारणताग्राहकेतद्दिशेषितयान्वयव्यभिचारनिर्णायकतत्संशयोऽपिप्रति
बंधकस्त्वकिंवपक्षत्रवह्निमान्वह्निव्याप्यवान्नयवेत्तःएवंसत्यनुमितेनंतरंविशेषसाधनमितिसमूहालंबनानुमित्यनंतरंअनुमित्यंतरेच्छातत्तावत्स्व
नुमित्यंतरेतरत्रस्वरिताकथंतदायोग्योभावात्तादृशासिषाधयिषामाकष्तारावृत्तीनोसर्वैषोतादृशानुमित्यव्यवहितप्राक्क्षणावृत्तित्वेनतद्भिन्नत्वाभाव
स्यव्यभिचारनिर्णायएवंसस्वरसादाहउपादीयतेविलातयावत्तत्रमप्यमानुमित्यसत्त्वक्षणासंबंधस्यैवत्तादृशानुमित्यव्यवहितपूर्ववर्तिभिन्न
त्वेनप्रतिबंधकत्वान्नसिषाधयिषोत्पादकालेऽनुमितिःस्वसमानाधिकरणोत्पत्तत्वसमानाधिकरणत्वेक्षणासंबंधस्यविलक्षणास्वरूपसंबंधेनवाच्य।
तादृशासमयस्यपुरुषान्तरीयानुमित्यव्यवहितपूर्वक्षणावृत्तित्वात्तत्संबंधपर्यंतानुधावने॥तज्जातीयतत्तरसमयसंबंधस्यतत्तादात्म्यस्यवसत्वात्तत्पुरुषांत
रीयानुमितिःतत्समानाधिकरणेतिनोक्तदोषः।ननुतादृशक्षणासंबंधानांस्वरूपसंबंधात्मकतयातत्तदात्मरूपत्वेनैतत्क्षणारूपत्वेवास्यातत्तत्तदात्मनः
प्रतिबंधकत्वमसंगतमेव।क्षणास्यचस्वसमानाधिकरणपुरुषान्तरीयानुमित्यव्यवहितपूर्वक्षणावृत्तितयातद्भिन्नत्वाभावादसत्तत्राह।भवेदितितयाच
तत्तत्पुरुषीयानुमितित्वस्यकार्यतावच्छेदकत्वात्तत्पुरुषांतरेतादृशानुमित्युत्पादःपुरुषांतरीयानुमित्यव्यवहितपूर्वक्षणास्यतत्तत्पुरुषीयानुमित्युज
नकत्वात्कारणतत्पुरुषीयेति।यत्रमध्यमाहीनाकारणत्वरूपांशमाह।तादृशेतिनिवतत्तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणास्यतत्क्षणाविशिष्टस्य
परामर्शादेःपुरुषांतरेऽपिसत्वात्तत्रापितत्पुरुषीयानुमितिप्रसंगइतिवाच्यंतदात्मसमवेतजन्यंप्रतितदात्मत्वेनसमवायिकारणत्वकल्पनात्पुरुषांतरेनतादृशीया राम०

नुमित्युत्पादनासंभवात्इति॥वस्तुतस्तत्तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणैकस्याभवात्तउत्तरमक्षणद्वयमेवसम्यगितिध्येयम्।पत्क्षिप्यकारणत्वेकोदोषइत्यतआहन
घाव्येति।निरुक्तानुमितिकारणस्यसर्वत्रसंभवादनुमितिसामग्र्यभावेनोपमानादेःप्रमाणान्तरत्वकल्पनेऽनुपपत्तिःस्यादित्यर्थः।नन्वयमित्यव्यवहितपूर्वक्षणास्यानुमित्य
व्यवहितपूर्वत्वाभावात्कथंसर्वत्रानुमिति।सामग्र्यामेवायंप्रतिबंधकःस्वानुमितिकत्वनयेवस्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणात्वत्रत्वादित्वा
कृतकार्यकारणाभावेनिर्वाहात्त्रोपमितिःतत्सामग्रीबलसत्वइतिचेत्तर्हिअनुमितिरस्थलेउपमितिकल्पनेयेवस्वसमानाधिकरणोपमित्यादी
नाक्षेपरात्कृतकार्यकारणभावेनतन्निर्वाहात्नानुमितिःकल्प्यास्यात्यदिवानुमितिनोमित्सनोपमितेतामीनुव्यवसायबलादनुमितिक्षणाउपमित्याभावस्या
नुभाविकत्वान्नोपमात्रेणानुमानस्यान्यथासिद्धिस्तदाउपमिनोमीत्यनुव्यवसायबलादुपमानादेरपिनान्यथासिद्धिरितिसस्वरसादाहविलीयतेतिप्र
मर्शस्यापितादृशाव्यवहितपूर्वक्षणावर्तित्वविशिष्टत्वादिनाकारणत्वस्योक्तत्वात्परामर्शत्वेनेतिएवंबाधस्यापितादृशाव्यवहितपूर्वक्षणावर्तित्वेनभिन्न
त्वेनप्रतिबंधकत्वाद्बाधत्वादिनेतिआदिनातदभावव्याप्यवत्वनिश्चयत्वादिपरिग्रहःकार्यान्तरेषुप्रसङ्गघटादिदाहाद्यात्मकेषुकृप्तानांसन्निकर्षादीनां
दंडादीनोवकारणानाम्एवंकृप्तानामप्यादेनामतथात्वेअकारणत्वमप्रतिबंधकत्वेवअकृप्तानांवतादृशानांसंभावव्यवहितपूर्ववर्तित्वविशिष्टानांतादात्म्य
परिमाणादीनांतादृशघटादिकारणाकपालमात्रत्वनिहितत्वादीनांकारणत्वस्यात्।एवंदाहेप्रतिदाहव्यवहितपूर्ववर्तिमिन्नत्वेनप्रतिबंधकत्वासंभवारे।
नामपिप्रतिबंधकत्वस्यादित्यर्थः।अतएवकारणतावच्छेदकसमाजाधीनकार्योत्पादस्यकारणतावच्छेदकादिनिवेशादवहितीयापीति।अनुमित्यव्यवहितपू
र्ववर्तिसिद्धिमित्र्यासिद्ध्यभावस्वपक्षलेतिकस्यापिस्वरणातरमाहवैयर्थ्याद्येतिअनुमित्यव्यवहितपूर्ववर्तिभिन्नत्वेनस्वतरस्यापिप्रतिबंधकत्वेसाक्षिविरहात्सि
द्धैवेयर्थ्यमित्यर्थः॥उपाध्यायमतमुपन्यस्यतिसिषाधयिषेतिअनुमानात्मकसाधकमानस्यतादृशस्यसत्वान्हिघाधयिषाभावकालेकराप्यनुमितिकोत्पादनाः

भा० तुमानातिरिक्तेति सिद्ध्युपहितं तावजन्यसिद्धिविशिष्टेत्यत्र तत्सामग्री सिद्धिसामग्रीत्वद्युपहितस्याभावेनेति स्वजन्यसिद्धिकाल एव तदुपहितत्वस्य तादृशस्य धर्यः अनुमानातिरिक्तेति अनु
६० मितेः पूर्वमनुमानस्यापि तदुपहितत्वाभावादित्यर्थः। यद्यपि सिद्धिकाल एव सिद्ध्युपहितत्वेन तादृशसिद्ध्यभावे हेतुत्वेनैव तादृशसिद्ध्युपहितसाधकमानाभावोपि लभ्यत इति साध
कमानमपेक्षितमपि यथैव तथापि स्वजन्यसिद्ध्यासाद्यजन्यसिद्धिपूर्वकालीनत्वे सति स्वजन्यसिद्ध्युत्तरकालीनत्वमिति फलितार्थः। कारणाकालान्तरकालीनत्वपा
दिसिद्ध्युपहितत्वेनिरूप्येतेत्यत आह जनितेति सिद्धिकार्यसिद्धिसामग्रीकालावच्छिन्नचरमादिकालता दृशसिद्धेरभावाहतत्रानुमितिवारणाय साधकमानपदस्य
सार्थक्यमपि सिद्ध्युपहितस्यैकस्यानुमानस्य तादृशसिद्ध्यभावदशायामनुमित्युत्तरज्ञानकत्वादनुमानातिरिक्ते सत्येव यथामित्यर्थः अनुमितिसामग्रीति अ
नुमितिसामग्रीतादृशप्रत्यक्षसामग्र्यभावघटितात्तादृशप्रत्यक्षसामग्रीवानुमितिसामग्र्यभावघटितेतितादृशसामग्रीज्ञानाधीनमपरसामग्रीज्ञानमितिकार्य
कारणाभावग्रहे न्योन्याश्रयादेतादृशकार्यकारणाभावग्रहाभाव इत्यर्थः केचित्तु प्रत्यक्षहस्याराद्युक्तेति प्रतियोग्यारोपे प्रतिस्यारोपत्वारोपेत्यर्थः अभावप्रत्यक्षेति अभावलौ
किकप्रत्यक्षेत्यर्थः उपनीतभानं तु सर्वतोदुर्बलमिति भावः। नद्भावेति स्यारोपत्वाभावेत्यर्थः केचित्त्वित्यस्वरसः तद्बीजं तु आरोपस्य हेतुत्वमेव रचितमिति। ननु
सिद्धिसामग्रीपदेन सिद्धसाधारणाकृतिपयकारणमेव घटत्वे ननु सिद्ध्युपधायकं यावत्कारणावर्त्तेनान्यापत्त्याप्रयः स्यात् अनुमित्साविरहविशिष्टप्रत्य
क्षसामग्र्यभावत्वेनानुमितिहेतुत्वमित्यत्र प्रत्यक्षसामग्रीवत्कर्मनियोगसमवहितत्वात् आलोकसंयोगावच्छेदकाच्छेदेन चक्षुर्वद्भिः संयोगादिरूपैव घटत्वेति
कथमन्योन्याश्रयः इत्यस्वरसात् द्वृक्तत्त्वितिजिं। स्वतन्त्रेतितादृशसिद्ध्यभावे विहाय तादृशसामग्र्यभावस्य तादृशसामग्र्यभावे हि हायतादृशसिद्ध्यभावस्या
न्यपद्यतिरेकादित्यर्थः तादृशान्यतराभावाय स्थिरसाकालेतादृशसिद्ध्यभावादेर्नियमेनायस्यीतत्वादित्यर्थः यद्यपितादृशान्यतरेनास्तीति प्राप्त्यादिवाधकालेतादृशसि
द्ध्यभावादेहेपस्थितिसाभावान्नियमसंभवः तथापि तदानीमपि मानसतादृशबोधसंभव इत्यभिप्रायः लाघवात्प्राधिरलाघवात्प्रत्येकमेवतादृशसिद्ध्यभावत्वादिने वात्र राम ०

न्यथा स्वात्मेत्थोरा प्रतिबन्धकयोरन्यतरत्वेनाभावस्य हेतुत्वेत्यत्रैवाप्रतियोगिकोटिविवा। नन्वनुमित्साविरहोयत्र विशेषणतयोरेवान्यतरत्वेनानुगमेननुवाधादेरपि।
अन्यथात्स्यप्रत्येके विशेषणत्वेगौरवादित्याशङ्क निषेधति। नचेति। अनुमित्साविरहस्य प्रत्येकमेव विशिष्टसिद्धिसमव्याप्यत्वत्वावश्यकत्वे दर्शयति। शाब्दसिद्ध्यादिसाल
क्षिकादिसिद्धौ सत्यां अशाब्दज्ञानेजायतामितीच्छानुदयात् शाब्देति तादृशेच्छायामशाब्दज्ञानेजायतामितीच्छाया। अनुमितित्वादीति आदिना प्रत्यक्षाम्
ज्ञानत्वादिपरिग्रहः। ननु सिद्धावनुमितिविषयेच्छाविरहस्य विशेषणत्वे पर्वतेवह्निः शाब्दसिद्धिसत्वेपि तदनुमितिजनकयद्विताप्रापरामर्शेसत्ववाशाब्दज्ञानेजा
यतामीतीच्छापन्नजनकतायति। नच अनुमितिविषयकेच्छाभावत्वेन विशेषणत्वमिति नार्थः किंतु अनुमितिविषयिणीयायाइच्छातत्सत्त्वशक्तित्वेनाभावः सिद्धौ विशे
षणेन प्रत्यक्षसामग्र्या घटानुमितिसामग्रीकालीनावा शाब्दज्ञानेजायतामितीच्छान तद्व्यक्तित्वेनोपादेयेति नोक्तातिप्रसङ्ग इतिवाच्यं तथा सति प्रत्यक्षसाम
ग्र्याम्प्रति तद्व्यक्त्यभावस्य विशेषणत्वे प्रति विरहात् न हि परिच्छाव्यक्तिसत्वेऽनुमितिः तदिच्छाव्यक्तिसत्वे प्रत्यक्षजातमस्त्वीति चेत् अशाब्दज्ञानेजाय
तामित्यस्य पर्वतेवह्निरशाब्दज्ञानेजायतामितीच्छायामित्यर्थः सिद्धावनुमितिविषयेच्छाभावेन; सिद्धावनुमितिविषयिणीयायाइच्छातदभावस्य विशेषणत्वेन
त्वमित्यर्थः। तथा च पर्वतेवह्निरशाब्दज्ञानेजायतामित्याकारकेच्छाभावघटिततत्तदिच्छाभावकूटविशिष्टसिद्धित्वेन प्रतिबन्धकत्वं वक्तुं शक्यते तेन तु तादृशेच्छा
भावघटितस्यामविशिष्टप्रत्यक्षसामग्रीत्वेन साधारणाय तावत्। अतएव पर्वतेवह्न्यभावमिति विषयकेच्छात्वेनैवरूपयत्रउत्तेजकत्वे प्रत्यक्षादिसामग्रीसमवहितत्वात् तादृशे
च्छावारणेतु सन्निवर्त्तकत्वादिनाकार्यमित्याद्यायेना हस्तनिवर्त्तकेति स्वेतादृशेच्छानिवर्त्तकयत्प्रत्यक्षं शाब्दमुपमितिम्वातत्सामग्रीसमवहितेयत्नस्तेतदम
तास्तित्यर्थः आदिना तत्तद्यत्स्यन्नतादृशेच्छात्वादिपरिग्रहः प्रत्यक्षादेरिच्छानिवर्त्तकत्वं तु स्वविषयसिद्धत्वमुद्रयाज्ञानेच्छास्थलेस्वरूपसत सिद्धत्वस्यापीच्छा

भा०

५८

विरोधित्वादितिस्वनिवर्त्तकानुमितिसामग्रीसमवहितेच्छासे महापमल्लभादीति प्रत्यक्षसामग्रीकालीनावयवैर्वह्नेर्ज्ञानं जायतामितीच्छानुत्तरनिवर्त्तकप्रत्यक्षसामग्रीकालीनेच्छेतिना
निप्रसंगः ।ननु सिद्धिमात्रे पाक्षुकाद्युत्तेजिकातत्तदिच्छाभावविशिष्टसिद्धिप्रसक्तादिसामग्र्यास्तत्तदनुमितित्वादिप्रकारकेच्छाभावसमुदायो विशेषणमस्तु तादृशसाधा
रणेच्छाभावसमुदायस्य प्रत्येकं विशेषणत्वे गौरवात् किंच यत्र विषयविशेषमनुमितित्वादिप्रकारिकेच्छा जाता न तत्र शाब्दं ज्ञानं जायतामित्येवमाकारिका तत्र
तादृशेच्छाभावस्य प्रत्येकविशेषणत्वे गौरवात् अन्यतराभावः कारणमस्त्विति सत आह । अन्यतरत्वेति सिद्धिभिन्नत्वे सति पक्षादृशसामग्रीभिन्नत्वे द्भिन्नत्वमन्य
तरत्वं किंवा तादृशसामग्रीभिन्नत्वे सति पक्षसिद्धिभिन्नत्वमित्यत्र विनिगमनाविरह इत्यर्थः ननु स्वरूपसंबंधरूपसंबंधरूपप्रकारतानां सा चावच्छेदकभेदादि
घते अवच्छेदकभेदोप्यवच्छेदकानामसमनियतत्वं प्रकृते च विशेष्यविशेषणताभावभेदेप्यवच्छेदकयोः समनैयत्यमेवेति कथं कारणताभेदः स्यादित्तत्रा
ह आत्मनिष्ठत्वेति तत्तत्पुरुषीयमनःसंयोगविशिष्टात्मकसंयोगावच्छिन्नं च काले द्वित्वमास्यन्तरेच्छायास्तदानीं सिद्धिकालेपि तदिच्छायाः स्वरूपयोग्यतामात्रादित्यर्थः तद्यथा
नेऽनुमित्सुपधानेऽनुमितेरिति तथा च कृत्यापि अनुमितिर्न स्यात् अनुमित्सुपहितत्वविशिष्टायाः इच्छाया अनुमितिपूर्वकाले ऽभावात्कारणतावच्छेद
कावच्छीठस्य वृत्तित्वस्याप्यंशे सादृश्यकत्वमतिनुक्षिप्तेऽसामान्यतोऽनुमितिप्रसंगः तत्त्वेऽस्य स्वरूपमिति भावः । तत्त्वात्सामग्रीसमवधाने अनुमितिसामग्रीसमवधाने अनुमिति
जनकत्वमित्यर्थः । कारणामात्रस्येति । मात्रपदेन तत्तद्व्यक्तिं यात्पूर्वतामात्रस्यैव कारणत्वे स्यादित्येककारणपरिशेषाय त्विति भावः ननु परामर्शादिसा
ऽन्यथा घटुविधानात्मेनतेनरूपपाहेतुत्वमप्यशक्यावृद्धेवदस्तत्त आह शेषेति अनुमितिसामग्रीसमवहितायाः इच्छायाः पक्षतत्त्वेसत्यनुमितिसामग्र्युत्तिरिच्छाभा
सामर्थ्ये यथा हि स्यर्थः ननु अनुमितिसामग्रीविशिष्टेच्छा ताऽजनकत्वं तु अनुमितिसामग्र्याः ननु तद्रूपेणेच्छाया अनुमित्सात्वेनेति सिद्धिकालेत्वनुमितिसामग्र्य
भावादिवानुमितिनिन्त आह तदानीमिति तदानीं सिद्धिकालेपरामर्शादिरूपकारणस्य निरोकरूपपक्षतायाश्च सत्वेऽनुमितिसामग्र्यभावापत्त्याभावात्तत एव हेतुरस्तु किंतु ॥ राम०

रूपसत्त्वेऽस्यर्थः वक्तव्यत्वेति तद्घकारणं सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपमवृत्तिरिक्तिनान्यदितिभा संयोगस्य समवायेनाभावो वृत्तिविशिष्टस्यैव तदनुमितिज
कः स्यादित्याशंकामपनेतुमुक्तमात्मनिष्ठत्वेति मित्रभिन्नत्वेति तादृशचक्षुःसंयोगप्रतियोगिवृत्तितयामकादृष्टादिसंबंधेनेत्यर्थः तत्तदसाधारणेति कालादिघटित
सामग्र्याः प्रतिबंधकत्वे मानाभावात् आलोकसंयोगावच्छिन्नमनःसंयुक्तचक्षुःसंयोगादिरूपायाइत्यर्थः तत्र सामग्र्यभिन्नभिन्नसंबंधेनाभावः कारणमिति
पूर्वेणान्वयः ननु दृशचक्षुःसंयोगविशिष्टमनोयोग एव प्रतिबंधकोक्तत यथा चात्मनिष्ठत्वस्य समवायेनोभयोरन्यतरत्वेनाभावः कारणमस्त्वत्त आह म
नो विशिष्टस्येति संयोगादित्तिरोत्वादिति भावः । प्रतियोगितावच्छेदकसंबंधभेदाद्भावैक्यसंभवमुक्तासिद्धितत्सामग्र्याः सिषाधयिषाविरहस्य प्र
तियोगितावच्छेदकस्य संबंधभेदादभावैक्यसंभवमाह एवमिति सिषाधयिषाकालीनसिद्धेरपि तदात्मवृत्तिताकालान्तरीयेण तत्तत्कालीनेन वान्ताऽवृत्ति
नाभावेन विशिष्टत्वादाह एककालावच्छेदेनैकात्मवृत्तित्वमिति । अस्यादृशामितियत्कालावच्छेदेनात्मनि भावस्तत्कालावच्छेदेन तदात्मीयमनःसंयुक्त
तादृक्चक्षुःसंयोगः प्रतिबंधकः तत्र सिषाधयिषाविरहविशिष्टत्वं तदात्मीयमनःसंयुक्तचक्षुः प्रतियोगिकत्वं तद्विशिष्टत्वमित्यर्थः पघत्तिलादृशसंयोगस्यस्वप्रतियोगि
चक्षुर्नियामकादृष्टसंबंधेनात्मवृत्तित्वात्पक्षकालावच्छेदेन तादृशादृष्टसंबंधेन तादृशसंयोगस्यात्मवृत्तित्वेन तत्कालावच्छेदेनात्मनि सिषाधयिषावि
रहेसत्वाप्येककालावच्छेदेनैकात्मवृत्तित्वेन विशिष्टत्वं वक्तुं शक्यत एव तथापि तत्र एकात्मवृत्तित्वे अभावस्य विशेषणतासिद्धेः समवाय अत्रचतादृ
शसंयोगस्यात्मवृत्तित्वेऽनेति सर्वथा संबंधेकमसंभवी त्विति भावः ननु सेवसामग्रीविशेषाभावस्यत्वं तेन राहेतुत्वे मएव किमिति न पृष्टत इत्याह सा
मग्रीतिलाघवात् तादृशसिद्धिसामग्र्यभावापेक्षयातादृशसिद्ध्यभावस्य लघुत्वात् एतदेव लाघवमेवदृक्षमुपलक्षणं सिद्धसाधनस्थले तादृशसामग्री
विशेषाभावस्य सत्त्वेपि पक्षव्यवहाराभावात्तादृशसिद्ध्यभावस्य पक्षतात्वेपि विरोधात्तत्र चमतिलाघवात् वक्षमाव एव तत्र प्रवृत्तिनिमित्तमस्त्वत आह फलेति । आव श्य

गा०

५२

कालेगौरवादितिचाधस्थलेपक्षव्यवहाराभावेनोक्तपक्षलक्षणेनेति। आवश्यकत्वेपक्षपदप्रवृत्तिनिमित्तस्यापधर्मस्य पसमतत्वमितिभावः। नन्वेवमात्मनिष्ठस्यैवसिद्ध्यभावस्यहेतुत्वात्पर्वता
दौकथंपक्षव्यवहारःस्यात्तदुक्तमाह विशिष्टसिद्ध्यभावस्येतिपरे परामसंबंधादितिसा। ज्ञातसंबंधेनसिद्ध्यभावस्यतथात्वेसिद्धिदशायामपिपर्वतेसमवायेनसिद्ध्या
वस्थलसमस्तत्वात्पक्षव्यवहारःस्यात्तत्र्याप्तमात्मसुखीयतदात्मत्वादिसत्रानुमातुःसिद्ध्यभाववत्त्वापापक्षोधतत्तदात्मनआहसुखीतिसिद्धिदशायांत
दात्मनिपक्षव्यवहारइतिपरेपरामसंबंधस्यपक्षतकालावच्छेदेनतदात्मनिव्यतपक्षभूयतत्साध्यकसिद्ध्यभाववत्तत्कालावच्छिन्नतदात्मीयतत्पक्षत्वेनतदात्मीय
तत्पक्षव्यवहारनिमित्ततदात्मीयत्वंचतत्सपक्षस्यतदात्मवृत्तित्वादशासिद्ध्यभावमपितियोगिसिद्धिनिरूपिततत्साध्यनिष्ठप्रकारतानिरूपिततत्पक्षतावच्छेदक
रूपावच्छिन्नविशेष्यत्वंतेनातीतानागतयोरप्यात्मनिसिद्ध्यभावकालितपक्षत्वमितिरितिध्येपनतुतदात्मीयनादृशावच्छ। संयोगस्यववृद्ध्यादेर्मत्वेपिदोषव
शाद्दृष्टादेरग्रहदशायांवह्नेरनुमितिदर्शनात्तत्रापिपित्वाद्यासामग्रीमध्येनिवेश्योदोषाभावपुरुषभेदनियंत्रितातिविषयेदि। पयोर्वन्तमानास्तत्रपुरुषोतरीयवक्ष्यविशेष
घातत्पुरुषीयचक्षुर्दोषस्यविषयदोषस्यवासत्त्वदशायामपितुरुषांतरस्यप्रत्यक्षोदयात्तत्कार्यसामान्यतत्सामग्रीविशेषाभावस्यहेतुत्वेआत्मवमतत्तत्पुरुषभेद
निवेशनियमवकाशादकारसामाव्माहएकस्यतितद्विरहिराःतत्पुरुषीयेतिअन्यत्रानुमित्सायांनतत्पुरुषीयत्वमन्वितंतस्यानुमित्सासत्त्वेपिघटादेतद्विरहस्यसत्त्वे
तत्कालीनेयाःसामग्र्याप्रतिबंधकत्वेपानात्किंतुतद्विरहेतावत्तत्पुरुषीयोऽनुमित्साविरहस्तत्कालीनानतद्भाराद्वृत्तित्वाविशिष्ट्यापात्तत्पुरुषीयसिद्धि
सामग्रीतद्विरहस्त्वर्थः। तत्पुरुषीयसिद्धिसामग्रीचतत्पुरुषीयचक्षुर्मनोयोगालोकसंयोगस्तत्पुरुषीयचक्षुर्विषयचतत्पुरुषीयतादृशा
दोषाभावश्चसेवरूपाआत्मायाइतिनोक्तदोषः। तत्पुरुषीयानुमित्साविरहकालेपुरुषांतरीयप्रत्यक्षसामग्र्यासत्त्वेपिनतत्पुरुषीयानुमितिसंभवात्सामग्र्यंनतत्पुरु
षीयत्वमितिअन्यथारुचिरितिवोक्तरीत्यासर्वपुरुषसाधारणस्यकार्यकारणभावस्यासंभवादितिभावः। सिषाधयिषाविरहकालीनानुमितोव्यभिचाराद्वाह। सिद्ध्युत्तरेति। एवं रामः

विशिष्टाभावस्याहेतुत्वेउत्तेजकाभावकालीनदाहेव्यभिचाराद्वाह। मण्यादिस्थलीयेति। अननुगतत्वादितिमणिः। मंत्रौषधादिसाधारणस्योत्तेजकत्वस्यैवाकस्मा
भावात्तदर्थः। ननुतेषामननुगतत्वेनहेतुषट्कविशिष्टाभावोपिकथमनुगतइत्यतआह। तावदिति। एतत्किंचित्तदुत्तेजकविशिष्टमण्यभावत्वेपितावदुत्तेजकाभा
वत्वमविशिष्टमेतदभावसत्वादित्यर्थः। इहापिअनुमित्सावपि। दर्शितइतिपादर्शापादर्शितादिनेतिशेषः। ननुयत्रपक्षकपक्षसाध्यकत्वेएकविधेव
सिषाधयिषापिपात्रतेनरूपेणाहेतुत्वमस्तुतःकार्यतावच्छेदकंखंडयनिसिद्ध्युत्तरेति। सिद्ध्युत्तरत्वमनुमितिसामान्यवृत्तितयाऽतिप्रसक्तोसिद्ध्यव्यवहितोत्तरत्वंचतत्त
द्व्यक्तिविश्रांततपारंपर्यननुगतमित्यर्थः। अनुमितिमात्रस्यैवस्वात्मकसिद्धित्वेपितत्कालीनत्वात्स्थितीतिस्थितिकालीनत्वेनतत्कालोत्पत्तिकत्वेतेननोक्तदोषः। ननु
सिद्धिस्थितिकालत्वंसिद्ध्यधिकरणकालध्वंसाधिकरणत्वेसतिसिद्ध्यधिकरणत्वंकालमात्रस्यैवतत्तत्सिद्ध्यधिकरणकालध्वंसाधिकरणत्वेसतितत्तत्सिद्ध्यधि
करणक्षणत्वेनतत्सिद्धिस्थितिकालत्वेवाच्यतयाचतत्तद्व्यक्तिविश्रांततयाकथमइत्यतआह। स्वेतरेति। अनुमितिमात्रस्यैवस्वात्मकसिद्धिकालवृत्तित्वेतरेतिय
घध्वत्रापिस्वत्वमेवप्राद्नतुगामण्यवतत्पापिस्वभेदावच्छिन्नस्याधिकरणक्षणोत्पत्तिकत्वसंबंधेनसिद्धिविशिष्टानुमितित्वेउत्पत्तिप्रवेशात्स्वानंतरोत्पत्तिक
सिद्धिविशिष्टानुमितेनव्यभिचारः। सिद्धिनाशकालइतितत्कालीनानुमितेर्निरुक्तकार्यतावच्छेदकानाक्रांतत्वादितिभावः। ननुस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व
संबंधेनसिद्धिविशिष्टानुमितित्वंनघास्तुव्यवहितोत्तरत्वेचद्वितीयतृतीयक्षणसाधारणोनिर्वाच्यमतआह। एकस्येति। अनुमित्सुत्सदिति। तदीयानुमिताव
प्यन्यदीयप्रसिद्ध्यव्यवहितोत्तरकालोत्पत्तिकत्वेनकार्यतावच्छेदकाक्रांतत्वादितिभावः। तत्सिषाधयिषाविरहेनतत्पुरुषीयसिषाधयिषात्वेनरूपेणवातिप्रसंगाभा
वात्कार्यकारणभावेपिनसामग्रीतइतिनाधिकरणापत्तसाक्षित्वयाभिविशनइतिभावः। ननुसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधे
नसिद्धिविशिष्टानुमितित्वंतत्वेपिनकार्यकारणभावानस्यअतआहापिचेति। सामान्यसामग्रीतइति। सिद्ध्युत्तरानुमितिस्थलेपावदुपायकपरामर्शाभावे

भा०
६३

नियोगादित्यस्य सिद्धिकालेपि सत्त्वात्सिद्ध्युत्तरं तथैव सामग्र्याऽनुमित्युत्पादप्रसंगः नच सिद्ध्युत्तरानुमित्युपधायकपरामर्शो व्यक्तित्वेन हेतुत्वस्यावश्यकत्वात्तत्र स्वाभावेच सिद्धि
कालेसामान्यसामग्री नाऽनुमित्यनुत्पाद इति वाच्यं परामर्शेनैकानुमित्युत्तरे विनश्यदवस्थेन विनापि सिषाधयिषामनुमित्यंतरजननायोगात्तत्र परामर्शव्यक्तित्वेनान्यमनो
योगादिव्यक्तीनां सत्त्वात्तत्र तत्तत्क्षणसंबंधस्यैव कारणत्वात् अनेनतानां क्षणसंबंधानां तत्तद्व्यक्तित्वेनानेनकार्यकारणभावमपेक्ष्यतादृशसिद्ध्यभावस्यैकस्यैव हेतुत्व
कल्पनायायुक्तत्वात् अन्यथा सर्वत्रैव तत्तत्क्षणसंबंधानां विशिष्य हेतुत्वेनैवातिप्रसंगभंगे विशेषकारणमात्रस्यैव कल्पनानस्यादिति। ननु सामान्यसामग्री वि
शेषसामग्रीसहितैव कार्योपधायिका मन्तव्य अत्र सिषाधयिषा रूपविशेषसामग्री विरहान्न कार्यमित्याशंक्य निषेधति नहीति। नादृशेति। सिषाधयिषारूपेत्यर्थः। न हि
शेषेति। तस्य राम्पूपी व्यक्तित्वेनमनोयोगव्यक्तीनामपि पूर्वोक्तरीत्या सत्त्वादिति भावः। ननु सिद्ध्युत्तरानुमितौ सिद्ध्यभाव एव विशेषसामग्री प्रकृते च तदभावान्न कार्यम
त आह तत्कल्पनेचेति। अतिगौरवमिति सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यैवतु भयत्रहेतुत्वकल्पनेनचातिप्रसंगेकार्यकारणभावद्वयकल्पनागौरवमित्यर्थः। शंकते। इह
जायमानेति इह सिद्धिस्थले साऽनुमितिः साच सिद्ध्युत्तरानुमितिः तत्कारणं सिषाधयिषा सा सिद्ध्युत्तरानुमितिः एतादृशसामग्र्यं विनापि सिषाधयिषा सिद्ध्यु
त्तरानुमितिजनकत्वात् एतादृशसामग्रीव प्रादनुमितिसामान्यस्यादित्यर्थः। कारणाभावमिति कारणाभावस्य पूर्वोक्तरीत्याऽसंभवतीति भावः। ननु पक्ष
ताहेतुत्वे परामर्शाविच्छेदकोत्स्वत आह। कारणव्यापारत्वेनेति यावत्कारणस्य व्यापारत्वनियमात्परामर्शस्य कारणत्वमावश्यकं पक्षतायास्तव्यापारत्वे संभवात्पक्ष
त्वविशिष्टपर्वते धूमं तज्ज्ञाने हेतुरिति क्रमेणावच्छेदकत्वमेवत्यर्थः प्रतिबंधकोत्तेजकेति बाधादीत्यर्थः। अन्यथा स्वतेन्नुगमान्वयव्यतिरेकशालिनोप्यहे हेतुत्वय
थासंभवमितियच्च निमित्तकारणस्य समवायिकारणप्रत्यासत्त्याकारणस्य कार्येणासंबंधत्वेतत्रसत्यर्थः यथाऽऽत्मप्रति ज्ञानादेस्तत्र ज्ञानविशिष्टत्वेनैव हेतुत्वाऽतिप्र
संगवारणासंभवादिति समवायिकारणस्यकार्येणसाक्षात्संबंधात्स्यकारणत्वमावश्यकमितिभावः तदभावस्य अनुमितिसाधारणसिद्ध्यभावस्य तदसंभवात्तादृश राम०

सिद्ध्यभावासंभवात् सऽनुमितिर्यस्येत्यादि कार्यसमकालतया कार्योत्पत्तिक्षणावच्छेदेन कार्याधिकरणादिशावृत्तितया तथात्वेन कार्यकालवृत्तित्वेन ननु सर्वस्य
प्रतिबंधकाभावस्य अन्यथा। एकत्र कॢप्तत्वेनैवान्यत्रापि कल्पने समवायिकारणस्येति। अन्यथा विनश्यदवस्थस्य समवायिकारणत्वेन निराश्रयत्वे क्षणिकत्वे च त
त्कार्यस्य स्यादिति यद्यपि प्रतिबंधकाभावस्य कार्यसहभूतत्वेन हेतुत्वात्कारणमात्रस्य तथात्वाव्यत्तिरिक्तुपस्य समवायिकारणस्येति विशेषणानुधावनमफलं
तथा कार्यसामान्ये समवायिकारणस्य तथाहेतुत्वे रूपे न तु प्रतिबंधकाभावस्य। पत्रगुणविशेषे द्रव्यविशेषे वा प्रतिबंधकत्वमेव न कॢप्तं तत्र तदभावस्य हेतुत्वा
दिति तथा प्रसक्तौ कार्यसहभूतत्वेन हेतुप्रसक्तौ। प्रभाकरा वेति तेषां कार्यसहवर्त्तिन एव हेतुत्वात् विनश्यदवस्थात्तादृशायां कारणत्वमात्रस्यैवाभावादि
ति भावः। अत्रेदं तत्त्वं यत्र पत्नेरोदाहो सन्निकृष्टततत्क्षणात्तदव्यवहितपूर्वक्षणे च मरणाद्यभावः रसाकारकान्वयव्यतिरेकाभ्यां हेतुत्वग्रहः मरणाद्युत्पत्तिकाले
प्यधिकरणांतरे मरणाद्यभावस्य सत्त्वात्पत्रे सस्यान्वयव्यतिरेकशरीरमध्ये निवेशः। न यावत्स्वाधिकरणक्षणाव्यवहितपूर्वक्षणावर्त्तित्वप्रसामस्त्या मरणाद्य
भावादेः कारणत्वं मरणाद्युत्पत्तिक्षणाव्यवहितपूर्वक्षणाच्च न तदधिकरणक्षणाव्यवहितपूर्वक्षणादिति। एवं समवायिकारणस्यापि स्वाधिकरणक्षणा
व्यवहितपूर्वक्षणादिति। एवं समवायिकारणस्यापि स्वाधिकरणक्षणाव्यवहितपूर्वक्षणावृत्तिप्रसामस्त्या कारणत्वे तेन विनश्यदवस्थस्य समवायेन न कार्योपधाय
काले कारणताग्रहस्यैव यदा घटोत्पत्तिस्तदा स्वाधिकरणक्षणाव्यवहितपूर्वक्षणे कपालमित्येवमिति। स्वाधिकरणक्षणाव्यवहितपूर्वक्षणे यदा कपालमितरका
रणसमवहितं तदा तत्र कपाले तदुत्तरक्षणे घटः रसाकारकान्वयव्यतिरेकग्रहः। तत्तद्दिधेनेत्तेदाहं प्रति तत्तद्दिधेनेतद्दाहोत्पत्तिकाले न मरणाद्यभावस्य
न हेतुत्वं कारणतावच्छेदकावलीढस्य वह्न्यादेः सत्त्वे कार्योपधाने तेनैव तत्तद्दाहोत्पत्तिक्षणावृत्तित्वविशिष्टस्य तत्तद्दाहपूर्वकालसत्त्वविवक्षितः एवं तत्तद्

भा०
६४

दृष्टमिति तत्कालीनतत्कपालत्वेन हेतुत्वे सामान्यसामग्रीविशेषसामग्रीसहकारी तेन वकृप्तपार्थिवे कैतिविनष्टपटद्वयस्थकार्यालेन घटोत्पत्तिरिपुसर्पिके चित्प्रामाव
रात्वित्तिघटविदिति। पत्रानुमितिसुसत्ति स्तेरपि परामर्शानन्तरसामग्रानुत्पन्नान्तेत्यर्थः परामर्शेति। परामर्शप्रवाहस्यानुमितिप्रवाहस्येत्यर्थः एकानुमितिना
शानन्तरमेवापरानुमितिरिस्त्यत्राहकालभेदेति। मिद्धेरप्रतिबंधकत्वके यत्र सिद्धसाधनेऽप्यवगमेन परस्मिन्निपृहस्सल आहपरार्थेति। अर्थांतरेति। सि
द्धेर्ये आको साविरहान्त दमिधानमर्थांतिरभिलत्यर्थः। पक्षतासमाप्ता लक्षणेति। व्याप्तिप्रकारकपक्षधर्मताज्ञानपत्वेन ज्ञानानुमितिलक्षणस्य
तोसर्थः। पक्षतया सहैककार्यत्वमेव संगतिरितिशेषः। अव्यापकत्वादिति। व्याप्त्यनुभवस्यापि अनुमितिहेतुत्वपातस्येत्याह एकत्वादित्यर्थः। अवच्छे
दकलाघवमासमवति कस्य नालाघवस्य परामर्शहेतुत्वेनिस्वादिनावस्यमाराच्चातहपश्याहमप्यमूपस्थितनयति। व्याप्तिप्रकारकपक्षधर्मताज्ञा
नापेक्षया व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानपक्षधर्मताज्ञानयोः अग्रसस्तु सत्त्वेन तदुपस्थितिरेवास्यति। साधवदुपस्थितसेन्तरकल्पनागौरवात्तत्प्रयम
पस्थितत्वस्य च हेतुत्वमिति क्रमेणाप्राप्तमिको पस्थितस्यापि लाघवपर्ययवसानुमितिभावापरामर्शहेतुत्वेनेतिम्लेच्छूमवान्पर्वत इति ज्ञानस्यापि पर्वतत्वरूप
विशेषणतावच्छेदकरूपापरामर्शहेतुत्वेवाच्यःकल्पनालाघवं दर्शयति। परामर्शहेतुत्वेति। तादृशे ज्ञाने। व्याप्यतावच्छेदकरूपेण व्याप्तिप्रकारकपक्षधर्मतयाऽऽज्ञानेऽ
तिरिक्तधर्मिणः वह्निव्याप्यधूमवान्पर्वत इति विशिष्टज्ञानरूपस्य हस पिकल्पनामिसत्वात्वेति। तत्र प्रतिरिक्तधर्मितोऽस्मानुमयाति। मात्रपदेन निप
त रूपं वत्तेर्धर्मि शेतावच्छेदः आलोकत्वेन वतिद्धमत्ववदालोकत्वस्यापि वस्तुगत्या व्याप्यतावच्छेदकत्वादिति भावः। पृहमावच्छेदेनेति। तत्तुवस्तुगत्या
पव्याप्यतावच्छेदकेतत्प्रकारकेपक्षधर्मताज्ञानमित्यर्थः तथा विधे कज्ञानाद्युत्पन्नमितुसत्तेराह हेतुत्वमिति। अवच्छेदकेति। व्याप्यतावच्छेदकप्रकार
कव्याप्तिज्ञानत्वापेक्षया व्याप्तिज्ञानत्वस्यावच्छेदकस्य लघुत्वादित्यर्थः व्याप्तिज्ञाने विवेति। तथा च तत्तत्त्वनियतमसत्ताकत्वाद्वक्तज्ञानस्य तदुपजीव्यत्वात्सिद्धिमितिभावः। एतावता राम०

तापि व्याप्तिज्ञानस्यैवानुमितिहेतुत्वं लब्धं न तु परामर्शस्येत्यतस्तदपि साधयति एवं चेति। अतिप्रसंगेति पक्षधर्मताज्ञानाभावदशायामनुमितिप्रसंगइत्यर्थः कारणांतरं व्याप्यता
वच्छेदकप्रकारेण पक्षधर्मताज्ञानरूपं तत्त्वनुमितेः पूर्वं व्याप्तिज्ञानमुभयमतसिद्धमेवेत्यतस्तस्य सिद्धिमूलमसंगतमतआह सिद्धस्येति। एवं चेत्यादिना वाक्यार्थं प्रदर्शितोपजीव्यत्वादिति
पाठस्य अंजुत्याव्योन्तरमाह पदेति। व्याप्यत्वप्रकारकमिति। इत्यं च मूलेव्याप्यत्वज्ञानमितिसामान्यशब्दो विशेषपरइतिभावः। तद्धेतुत्वमनुमितिजनकत्वेति शेषः। विशिष्टज्ञानेति।
तथा च ज्ञानद्वयकल्पनापेक्षया विशिष्टज्ञानकल्पनमुपजीव्यं न तु ज्ञानद्वयोत्पाद इतिभावः। ननु विशिष्टज्ञानान्यथानुपपत्त्या ज्ञानद्वयैककल्पनीयेऽपि विशिष्टज्ञानमनुमितेः पूर्वं सिद्धमेवे
त्यतस्तत्रादिदोषासंगतिरत आहत्वसंवेदनेति। स्वविषयकं संवेदनं स्वप्रकाशरूपमेव ज्ञानद्वयेऽप्रमाणमित्यर्थः ननु तथापि तस्यावश्यकत्वे विशिष्टज्ञानोपस्थितिरुपजीव्या
स्यादतआहावश्यकत्वे चेति। तथा चावश्यकत्वादिस्वरूपाभ्यवादिसिद्धत्वादिना पूर्वोनतु विशिष्टज्ञानोपपादकतया ज्ञानद्वयस्यावश्यकत्वादित्यर्थः इतिभावः। असिद्धे
रनुमितेः पूर्वं विशिष्टज्ञानस्यासिद्धेः। व्याप्योपस्थित्यभेदज्ञानस्य पक्षधर्मताविषयकदर्शनापव्यावृत्तेः अपामिति। अत एव स एवानुमितिहेतुरिति संगच्छते पक्षधर्मता
पाश्चविषयत्वे परामर्शत्वाभावात्र दसंगतेः। स एवानुमितिहेतुरित्यत्र हेतुमुद्दपतिलाघवादिति स्मृतिहेतुत्वेति। नव्यमते प्रथमं पर्वतवह्निर्धूम इति ज्ञानेन तनो वह्निव्या
प्यो धूम इति स्मृतिस्ततो यस्मिन्क्षणे पर्वतवह्निर्धूमो वह्निव्याप्य इति परामर्शस्तत्सादसंभावनात्तस्मिन्नेव क्षणेऽनुमितिसामग्रीबलवत्त्वात्तस्यानुमितिर्न परामर्शः सा चैतन्मते तु
पर्वतवह्निर्धूम इति ज्ञानकाले व्याप्तिविषयकोद्बुद्धसंस्काररूपसंनिकर्षवशात्पर्वतवह्निर्धूमो वह्निव्याप्य इत्याकारकमेवानुभवात्मकं व्याप्तिज्ञानं प्रथमतो जायते न
त्वेतत्पूर्वं व्याप्तिस्मृतिरितिव्याप्तिज्ञानाभावात्परामर्शपूर्वमनुमितिसामग्र्यामर्थः। अस्यपि सतो दर्शनतो गोचरसंस्कारजन्यत्वस्मृतिरितिव्याप्तिज्ञानाभावान्नत्वाप

२७

भा॰ ६५ निरततत्त्वनास्मृतिः कारणमिति निर्णीकारादिमतं तन्न संस्कारस्यैव कारणमित्याद्युपपादितं। मूले व्याप्तिधूमत्वयोरित्यत्र धूमत्वे पर्वतत्ववह्निधूमत्वं। मूले तत्र धूमतत्त्वादिना प्र
पक्षिकधूमत्वस्य पक्षधर्मताविषयकस्य परामर्शत्वमुक्तं। पक्षपक्षधर्मत्वाविषयकं धूमो व्याप्य इति प्रत्यक्षं ततः पक्षधीः ततो वह्निव्याप्योयं धूमः पर्वतीय इति वह्निव्याप्यधूमव
त्पर्वतप्रतीत्या परामर्शस्यापि संभवतीत्याह। पक्षेति। पक्षग्रहः इति। पक्षे ग्रहेत्वपदैव धूमे व्याप्तिवैशिष्ट्यधीस्तदैव पक्षीयत्वस्याविषयत्वेन वाद्यनुमितिवत्स्यादिति। अन्ये तु तदेव गृहीते पक्ष इति
। व्याप्यविशेषकपरामर्शे पक्षस्य विशेष्यतात्वात् पक्षविशेष्यकेपि पक्षतावच्छेदकानामकविशेषणज्ञानस्य संयोगादिसम्बन्धेन पक्षतावच्छेदकविशिष्टाद्याकारस्य च हेतोः संपादनायोक्तं। न
नुव्याप्तिस्मरणस्यैव आवश्यकत्वात्प्रथमतः स्मरणविशिष्टज्ञानेऽन्वयोऽनुपपन्नः अत आह प्रथमतः इतीति। ननु भवत्वेवं हेतुकलाघवं तथापि कल्पनालाघवमेव धर्मिमंतस्य कानाम्नूले भ
विष्यतीत्यत आह एवं चेति गुरुधर्मेति। व्याप्यतावच्छेदकप्रकारकव्याप्तिधीत्वं तत्र कारकपक्षधर्मधीत्वं चेति द्वयमित्यर्थः। लाघवमिति व्याप्तिप्रकारकपक्षधर्मताधीत्वेनेत्यर्थः। तथाच पर
